श्रीमद्वराहमिहिराचार्य विरचितम्

विवाहपटलम्

भट्टोत्पलविरचितविवरण सहितम्

भावबोधिनी टीकाकार तथा संपादक
देवीप्रसाद लंसाल

श्रीमद्वराहमिहिराचार्य विरचितम्

विवाहपटलम्

भट्टोत्पलविरचितविवरण सहितम्

ज्योतिषाचार्येण लंसालोपाह्वेन देवीप्रसाद शर्मणा
विरचिता भावबोधिनी टीका सहिता

राष्ट्रिय अभिलेखालयतः
प्रकाशिता

काष्ठमण्डपः
२०३५

प्राक्कथन

समाज व्यवस्था अन्तर्गत जुत चार आश्रमको व्यवस्था छ ती मध्ये गृहस्थाश्रम नै सर्वोत्तम मानिएको छ। किन कि सृष्टिको प्रादुर्भाव नै स्त्री र पुरुषको पवित्र संगमबाट हुन्छ। यो कुरो निर्विवाद सिद्ध छ कि परम पिता परमेश्वरले विश्वसृजनका उद्देश्यले आफूलाई नर र नारीका रूपमा दुईभागमा मूर्तिमान खडा गर्नुभयो। जस्तै बामाङ्गलाई स्त्री र दक्षिणाङ्गलाई पुरुषका रूपमा मानेर विस्तार विस्तारै उपर्युक्त स्त्री र पुरुषद्वयबाट विशाल जन–समूह खडा भयो। यसरी उत्पन्न भएका नर नारीले आफ्नो संस्कृतिको क्रमिक विकासको साथसाथै आफू समानका सम्बन्धीहरुसंग विवाह सम्बन्धी लिनु–दिनु गर्नु पर्दछ भन्ने आवश्यकता अनुभव गरे। उपर्युक्त आवश्यकताले अन्ततोगत्वा "विवाह प्रथालाई" जन्म दियो। जुन प्रथा पछि आउने सन्ततिका निमित्त अत्यन्त उपयोगी सिद्ध भयो। गृहस्थ आश्रमको आधारशिला नै विवाह संस्कार हो र त्यसैको माध्यमबाट मानव देवऋण, ऋषिऋण, तथा पितृ ऋणबाट उऋण हुन्छ। तर सम्झनु पर्ने कुरो यो छ कि केवल सुशीला, सौन्दर्ययुक्ता पतिपरायणा स्त्री र कर्तव्यपरायण वीर्यवान् सुसंस्कृत पुरुषको समागम भयो भने मात्र संसार सागरबाट उनीहरूको जीवन डुङ्गा आनन्दपूर्वक पार उत्रन्छ। अतः सुपरीक्षित वर–कन्याको विवाह संस्कार विशुद्ध समयमा नैहुनु पर्दछ भन्ने तथ्यलाई लिएर विवाह–उपयोगी "विवाह पटलम्" भन्ने ग्रन्थ आचार्य वराह मिहिरले लेखेका हुन्।

कन्या दानका लागि निम्न लिखित वरहरू अयोग्य मानिएका छन्। जस्तैः– पडोसो, अन्धो, हिंसक, बूढो, धेरै बोल्ने, अङ्गहीन, परिवेत्ता (भाइको विवाह भैसकेको) कुष्ठरोगी, छारे रोगी, क्षयरोगी, व्यसनी, वर्ण–शङ्कर, वेश्यागामी, जुवाडी, कुनै प्रकारको जीविका गर्ने बाटो नभएको, आफूभन्दा धेरै धनी, मूर्ख, दुराचारी, पथभ्रष्ट, लोभी, कलङ्क लागेको, शौर्यहीन, क्रोधी, आफ्नो प्रशंसा गर्ने, कुरूप, ऋणग्रस्त, विकलाङ्ग, अपरिचित, शिष्टताहीन, खरावलतमालागेको उपर्युक्त लक्षणका वरलाई कन्यादान निषेध गरेको छ।

कुलटा, रोगिणी, कैलाआँखा तथा केश भएकी, धेरै बोल्ने, शरीरमा अधिक रोम भएकी र रोमैनभएकी, विकलाङ्गी विशाखा, ज्येष्ठा, मूल, अश्लेषा, शतभिषा नक्षत्रमा जन्मिएकी, कुरूपा, नक्षत्र, नदी, पर्वत वृक्ष, पक्षी, सर्प आदि डरलाग्दो नाम भएकी अज्ञातकुलकी, दाँत अगाडि निक्लिएकी, दुर्बल, दाह्री, जुँगा आएकी, कलङ्क लागेकी उपर्युक्त लक्षण भएकी कन्यासंग विवाह नगर्नु भन्ने आचार्यहरूको भनाइ छ।

जन्मलग्न तथा प्रश्नलग्न दुवैबाट कन्याको वैधव्ययोग देखिन्छ भने शुद्धमुहूर्तमा शास्त्रानुसार, कुम्भविवाह, अर्कविवाह, सुबर्ण प्रतिमा विवाह आदि शान्ति गर्नु पर्दछ र वैधव्य आदि दुष्टयोगहरूको परिहार हुन्छ।

"बाल वैधव्ययोगेऽपि कुम्भद्रु प्रतिमादिभिः।
कृत्वालग्नंरहः पश्चात्कन्योद्वाह्येतिचापरः।"
मार्कण्डेयपुराण।

यदि कन्याको वैधव्य योग देखिन्छ भने दीर्घायु योग भएको वरलाई दिनु ।

"वरायायुष्मतेदेया कन्यावैधव्ययोगजा ।"

इत्यादि उल्लेख प्रशस्त मात्रामा उपलब्ध छन् ।

यसप्रकार समाज व्यवस्थाको लागि हाम्रा पुर्खाहरूले वैवाहिक संस्कारलाई सबभन्दाबढी महत्व दिएका छन् र यसबारे विभिन्न ग्रन्थहरूमा विभिन्न स्थानमा विशेष चर्चा परिचर्चा पनि गरेका छन् । जसको अनुशरणमा मानवकल्याण निहित छ, अनुशरण नगरेको पक्षमा कडा विघ्नको सामना मानवमात्रले गर्नुपर्ने कुरा निश्चित छ । अब प्रस्तुत ग्रन्थबारे केही चर्चा गरौं ।

प्रस्तुतग्रन्थ वराहमिहिरद्वारा लिखित 'विवाह पटलम' भन्ने ज्योतिष विषयको ग्रन्थहो । यो ग्रन्थ आजसम्म प्रकाशित भएको छैन । राष्ट्रिय अभिलेखालयको चतुर्थ लगतमा नं २२९१ संख्यामा दर्ता भएकोछ । पत्र संख्या ४४ लम्बाई १७ इन्च चौडाई ३½ इन्चको छ । पङ्क्ति ८ देखि १० सम्मका छन्, एक पंक्तिमा ५६ अक्षर देखि ६२ अक्षरसम्म छन् । यसमा भट्टोत्पलको टीकाले सुनमा सुगन्ध थपेको छ । टीका र मूलसमेत मिलाउँदा ग्रन्थ-संख्या १३२७ पुग्दछ । विभिन्न छन्दका मूल श्लोक ९२ छन् । संस्कृत भाषानबुझनेले पनि यसग्रन्थको भाव बुझन सकुन् भन्ने विचारले मैले राष्ट्र भाषामा भावबोधिनी टीका पनि लेखिदिएको छु ।

यसग्रन्थको आदिमा आचार्यले मङ्गल गर्दा विवाहका सम्बन्धित देवता कामदेव हुनाले सर्व देवताभन्दा कामदेवलाई नै सर्वोत्तम सिद्ध गरेर उनैलाई नमस्कार गरेका छन् । त्यस पछि ग्रन्थ शुरू गर्दै गएर सुयोग्य ज्योतिषीका सल्लाहद्वारा प्रथम वयमानै कन्याको विवाह गर्नु पर्दछ भन्ने आचार्यको भनाइ छ ।

मनुले विवाह आठ प्रकारको वताएका छन् जस्तै-

ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥
मनु अ ३. श्लोक २१

१. ब्राह्म विवाह- पढेलेखेको सुयोग्य वरलाई आफैले बोलाएर यथाशक्ति अलङ्कारादि दिएर जुन कन्यादान दिइन्छ त्यस प्रकारको विवाहलाई ब्राह्मविवाह भनिन्छ ।

२. दैवविवाह-राजसूय, अश्वमेध, सोमयाग जस्ता ठूला ठूला यज्ञमा वरण भएका ऋत्विकलाई सालङ्कार कन्या दिनुलाई दैव विवाह भनिन्छ ।

३. आर्षविवाह- वरलाई बोलाएर कन्या दानका साथसाथै गोमिथुन (गाई र गोरु) सहित दान दिइने विवाहलाई आर्ष (ऋषि) विवाह भन्दछन् ।

४. प्राजापत्य विवाह- कन्यादाताले तिमी दुवैले हरेक धर्मकर्म साथसाथै गर भनेर प्रतिज्ञा गराएर गरिदिने विवाहलाई प्राजापत्य विवाह भनिन्छ ।

५. गान्धर्व विवाह- वर कन्या दुवैको प्रेम सम्बन्धबाट हुने विवाहलाई गान्धर्व (प्रेम) विवाह भनिन्छ ।

६. आसुरविवाह- कन्यादातालाई धन दिएर कन्या किनेर गर्ने विवाहलाई आसुर (असुर) विवाह भन्दछन् ।

७. राक्षस विवाह– लडाईं झगडा गरेर बलात्कार कन्यालाई रुवाउँदै हरण गरेर लगी आफ्नो इच्छानुसार गरिने विवाहलाई राक्षस विवाह भन्दछन् ।

८. पैशाच विवाह– सुनेकी मद्य आदि नसा लाग्ने वस्तु खाएर वेहोस भएकी अथवा एकान्तमा वसेका वेलामा कुनै उपायबाट पनि आफ्नो शीलरक्षागर्न असमर्थ कन्याको वलात् शील भङ्गगरी पछि स्वीकार गर्दछ भने त्यस्तो विवाहलाई पैशाच (पिशाच) विवाह भनिन्छ । वर्तमान समयमा जुन विवाह संस्कार गरिन्छ त्यो 'प्राजापत्य' विवाह हो ।

९. पत्राचार विवाह- उपर्युक्त आठ प्रकारका विवाहका अतिरिक्त आजकल प्रचलनमा आउन लागेको पत्राचार विवाह प्राचीन कालमा पनि चलेको देखिन्छ । जस्तै– विदर्भ देशकी राजकुमारी रुक्मिणीले श्रीकृष्णलाई लेखेको पत्र यस प्रकारको छ ।

श्रुत्वागुणान् भुवनसुन्दर श्रृण्वतामे निर्विश्य कर्णविवरैं हरतोऽङ्गतापम् ।
रूपं दृशां दृशिमतामखिलार्थलाभं त्वय्यच्युताऽऽविशति चित्तमपत्रपमे ।
कात्वा मुकुन्द महती कुलशीलरूपं विद्यावयोद्रविणधामभिरात्मतुल्यम् ।
धीरापतिं कुलवती नवृणीतकन्या कालेनृसिंह नरलोकमनोऽभिरामम् ।
तन्मे भवान् खलुवृतः पतिरङ्गजायामात्मार्पिश्च भवतोऽत्रविभोविधेहि ।
मा बीरभावमभिमर्शतुचैद्य आराद्गोमायुवन्मृगपतेर्व लमम्बुजाक्ष ।।
पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलं भगवान् परेशः ।
आराधितोयदि गदाग्रज एत्यपाणिं गृह्णातुमे नदमघोष सुतादयोऽन्ये ।
श्वोभाविनित्वमजितोद्वहनेविदर्भान् गुप्तःसमेत्य पृतनापतिभिःपरीतः ।
निर्मथ्यचैद्य मगधेन्द्रबलं प्रसह्यमां राक्षसेन विधिनोद्वहवीर्यशुल्काम् ।।
अन्तःपुरान्तरचरीमनिहत्यबन्धूंत्वामुद्वहेकथमितिप्रवदाम्युपायम् ।।
पूर्वेद्युरस्तिमहतीकुलदेवयात्रा यस्यां बहिर्नववधूर्गिरिजामुपेयात् ।।
यस्याङ्घ्रि पङ्कजरजःस्नपनं महान्तोबान्छन्त्युमापति रिवात्मतमोऽपहत्यै ।
यर्ह्यम्बुजाक्ष नलभेम भवत्प्रसादं जह्यामसून् व्रतकृशान्छतजन्मभिस्यात् ।।

भागवत. द. स्कं ५२ अ

हे त्रिभुवन सुन्दर ! आफ्नो गुणगान सुन्नेहरूको हृदयमा कानद्वारा प्रवेश गरेर उनीहरुको प्रत्येक अङ्गकातापलाई शान्त गरिदिनु हुन्छ । मैले तपाईको उपर्युक्त गुणहरू सुनेकी छु । संसारमा आँखा भएका प्राणी जति छन्, तिनीहरूको आँखा हुनाको सबभन्दा ठूलो फाइदा आफ्ना आँखाले समस्त स्वार्थ र परमार्थका एकमात्र आश्रय तपाईको रूपको दर्शन गर्न पाउनु नै हो । मैले तपाईको रूपको वर्णन पनि सुनेकी छु । हे अच्युत ! त्यसै कारणले मेरो चित्त लोकलज्जालाई छाडेर तपाईको चिन्तनमा तन्मय भै राखेको छ ।

हे मुकुन्द ! शील, कुल, स्वभाव, सौन्दर्य, विद्या, अवस्था, ऐश्वर्य, तथा प्रभाव आफू समानमै हुनुहुन्छ अर्थात

तपाईं समान अरुकोही छैन । तपाईंलाई देख्दा सबै प्रसन्न हुन्छन् । हे पुरुषसिंह ! तपाईंनै भन्नुहोसन, विवाह-योग्य भएकी कुन यस्ती कुलवती, गुणवती, तथा बुद्धिमती कन्या होली जो कि तपाईंलाई पतिकारूपमा वरण गरोइन ।

यसैले मैले मनैमनमा तपाईंलाई पतिकारूपमा वरण गरिसकेकी छु र तपाईंमा आत्मसमर्पण गरिसकेकीछु । हे कमलनयन ! जसरी श्यालले सिंहको भाग खोसेर लैजान शक्तैन त्यसै गरी हे वीर ! तपाईंमा समर्पित भएकी मलाई चेदिराज शिशुपालले यहाँ आएर मेरो शरीरमा स्पर्शगर्न नपाओस् ।

यदि मैले जन्मजन्मान्तरमा इनार, पोखरी आदि खनाएकी रहिछु, यज्ञयाग आदि गरेकी रहिछु, दान, नियम, व्रत तथा देवता ब्राह्मण र गुरु आदिको पूजाद्वारा अलिकता पनि ईश्वरको आराधना गरेकी छु भने भगवान् श्रीकृष्ण यहाँ आएर मेरो पाणिग्रहण गर्नुहोस् । उहाँ वाहेक दमघोषका छोराले अथवा अरुकसैले मलाई छुन नपाओस् ।

हे प्रभो ! तपाईं अजेय हुनु हुन्छ तपाईंलाई जित्नशक्ने यस संसारमा काही छैन । मेरो विवाह हुने एक दिन अगावै यादव सेनापतिहरू सहित विर्भदेशमा आएर शिशुपाल र जरासन्धका सेनालाई नष्ट भ्रष्ट पारेर वीरताको मूल्य चुकाएर राक्षस विधान अनुसार मसंग विवाह गर्नुहोस् ।

तिमी अन्तपुरमा वस्दछ्यौ तिम्रा दाजु-भाइ बन्धुवर्गहरूलाई नमारिकन तिमीलाई कसरी लैजान सकूँला भन्नु हुन्छ भने म उपाय बताउँदछु । हाम्रो कुलको रीतिरिवाज अनुसार विवाह भन्दा एकदिन पहिल कुलदेवीको दर्शन गर्ने ठूलो यात्रा हुन्छ । त्यस यात्रामा नववधूले सहर वाहिर पार्वतीको मन्दिरमा पैदल जानुपर्दछ । त्यसवेलामा तपाईंले मलाई हरेर लैजान सक्नु हुन्छ ।

हे कमलनयन ! उमापति शङ्कर आदि ठूला ठूला महापुरुषहरू पनि आफ्नो अन्तःकरणको अज्ञान हटाउन तपाईंको चरणकमलको धूलाले स्नान गर्ने इच्छा गर्दछन् । भाग्यवश मैले तपाईंको चरणकमलको धूलो पाइन भनेता व्रतद्वार आफ्नो शरीर सुकाएर प्राणत्यागनेछु । त्यसरी सयजन्मसम्म गर्दै जाँदा तपाईंको प्रसाद अवश्य पाउनेछु ।

उपर्युक्त रुक्मिणीको पत्र समाननै विदर्भ राजकन्या दमयन्तीले पनि आफ्नो हितैषी राजहंसद्वारा राजा नललाई आफू उनी प्रति आसक्त भएको समाचार पठाएकि थियिन् । जस्तैः–

अलंविलंब्यत्वरितुंहिबेला कार्येकिलस्थैर्य सहे विचारः ।
गुरूपदेशंप्रतिभावतीव्रा प्रतीक्षतेजातु नकालमूर्तिः ।।
अभ्यर्थनीयः स गतेन राजा त्वयानशुद्धान्त गतोमदर्थम् ।
प्रियास्यदाक्षिण्यबलाकृतो हि तदोदयेदन्यबधू निषेधः ।।
शुद्धान्तसंभोगनितान्ततुष्टे ननैषधे कार्यमिदं निगाद्यम् ।
अपांहितृप्ताय न वारिधारा स्वादुः सुगन्धि स्वदते तुषारा ।।
त्वयाविधेया नगिरोमदर्थाः क्रुधाकटुष्णेहृदिनैषधस्य ।
पित्तेनदूने रसनेसितापि तिक्तायते हंसकुलावतंसः ।।
धरातुसाराहिमदर्थयाच्ञाकार्यानकार्यान्तर चुम्बिचित्ते ।
तथाथितस्यनवबोधनिद्रा विभर्त्यवज्ञाचरणस्यमुद्राम् ।।
विज्ञेन विज्ञप्यमिदंनरेन्द्रे तस्माद् त्वयास्मिन् समयं समीक्ष्य ।
आत्यंत्तिका सिद्धि विलम्बिसिध्यो कार्यस्यकार्यस्य शुभा विभाति ।।

उपर्युक्त कामका लागि चाँडो जाउ विलम्ब गर्ने यो समय हुँन किन कि विरहजन्य असहनीय पीडाले कहिल्यै पनि समयको प्रतीक्षा गर्दैन । जस्तै कुशाग्रबुद्धि भएका छात्रले गुरुले पढाएको पाठ कण्ठस्थ गर्न समय पर्खदैन ।

यहाँबाट गएका तिमीले अन्यान्य स्त्रीहरूकासाथमा बसेका राजा नललाई दमयन्ती यसो भन्थिन् भनेर नभने किनकि आफ्ना प्रियतमाहरूका साथमा बसेर मनोरञ्जन गरिरहेका समयमा अन्यनारीहरूको चर्चालाई बेवास्ता गर्नेछन् । त्यसकारणले उपर्युक्त समयमा मेरो चर्चा नगरे ।

हे हंस अन्तःपुरमा रहेका नारीहरूसंगको सुरतबाट प्रसन्न भएका राजा नललाई मैले पहिले भनेका कुरा नभने, किनकि पानीले तृप्त भएकाले कपूर आदि सुगन्धी वस्तुद्वारा सुस्वादु बनाएको चीसो जल रुचाउदेनन् । जस्तै साधारण पानी पीएर प्यास बुझाई सकेकाले उत्तम पानी रुचाउदैनन् त्यस्तै साधारण नारीहरू सँगको सहबासबाट काम पीपासा शान्तगरिसकेकाले उनीहरूभन्दा उत्तम मलाई पनि रुचाउँदैनन् ।

हे हंसकुल शिरोमणि ! राजानल कारणवश कसैसंग रिसाएका रहेछन् भने त्यस समयमा तिमीले मेरो चर्चा नगर्नु किन भने जिब्रो पित्तका दोषले दूषित भएका समयमा चिनी खाँदा पनि तितै हुन्छ ।

हे हंस, राजानल उपर्युक्त विषयभन्दा अरू नै काममा व्यस्त भएका समयमा पनि मेरो कुरा नगर । त्यस समयमा कुरा गर्दा भनेको कुरा नसुन्नाले, नबुझनाले कार्यान्तरमा लागेको हुनाले आफूले अँटेको काम सिद्ध हुँदैन अतः उपर्युक्त सबै कुरा विचार गर ।

हे हंस त्यसकारण उपर्युक्त राजा नललाई बुद्धिमान् विशेषज्ञ तिमीले पूर्वापर विचार गरेर मेरो कुरा अनुरोध गर । यो काम सर्वथा नहुने अथवा विलम्ब हुने उपर्युक्त दुबैमध्ये बुद्धिमान् तिमीले जुन चाहिं उचित सम्झन्छौ त्यही गर । असमयमा भने गरेको काम सिद्ध हुँदैन, समयमा गरेको काम अलि ढीलो हुन्छतापनि त्यही नै उत्तम हो ।

१०. दर्ता विवाह–वर्तमान समयमा विवाहको प्रचलन विवाह दर्ता ऐन २०२८ बमोजिम पनि हुन लागेको छ ।

दर्ताद्वारा विवाह

४. विवाह हुन सक्ने अवस्थाः– प्रचलित नेपाल कानूनले विवाह हुननसक्ने अवस्थामा बाहेक देहायमा पुरुष र स्त्रीको बीच यो ऐन बमोजिम विवाह हुन सक्नेछ ।

१. पुरुष वा स्त्रीमध्ये कुनैको पति वा पत्नी नभए ।

२. पुरुष वा स्त्रीमध्ये कुनै बौलाएको नभए, र

३. पुरुषको उमेर बाईस वर्ष र स्त्रीको उमेर अठार बर्ष पूरा भैसकेको भए ।

५. विवाह गर्ने दर्खास्तः– यो ऐन बमोजिम विवाह गर्नचाहने पुरुष र स्त्रीले तोकिएको ढाँचामा दरखास्त लेखी विवाह अधिकारी समक्ष कम्तीमा पन्ध्र दिन अगावै पेशगर्नु पर्दछ ।

(२) उपदफा (१) बमोजिम दरखास्त दिनलाई पुरुष वा स्त्री दुवै वा सोमध्ये कुनै एकजना त्यस्तो दरखास्त दिनु अघि पन्ध्र दिनदेखि सम्बन्धित विवाह अधिकारीको क्षेत्रमा रही बसिआएको हुनुपर्छ ।

६. विवाह दरखास्त किताबः– (१) विवाह अधिकारीले दफा ५ बमोजिम प्राप्त दरखास्तको व्यहोरा तोकिएको ढाँचाको विवाह दरखास्त किताबमा चढाई प्राप्त दरखास्त आफ्नो कार्यालयको अभिलेख (रिकर्ड) मा राख्नु पर्दछ । त्यस्तो दरखास्त किताब निरीक्षण गर्न चाहने जोसुकैलाई निःशुल्क देखाउनु पर्छ ।

पातालनामनिगता पाणिग्रहणे च पञ्चमान्मासात् ।
सा प्राप्य दोषमतुलं परः प्राणान् परित्यजते ।।

विवाहको लग्न दिनुभन्दा पहिले उपर्युक्त नक्षत्रमा उपग्रह बसेको छ छैन भन्ने कुरो सर्वप्रथम निर्णय गर्नु पर्छ । उपग्रह युक्त नक्षत्रमा कन्याको विवाह भयोभने निम्नलिखित फल भोग्नु पर्दछ ।

यदि विद्युन्मुखनाम भएको उपग्रह बसेको नक्षत्रमा कन्याको विवाह भयो भने पुत्रवियोग सहनु पर्दछ। शूलनामको उपग्रह बसेको नक्षत्रमा विवाह भयोभने पतिको मृत्यु हुन्छ । सन्निपात नामको उपग्रह बसेको नक्षत्रमा विवाह भयो भने विवाह गरेको दश दिनमा पतिको मृत्यु हुनेछ । केतु नामको उपग्रह बसेको नक्षत्रमा विवाह भयोभने देवरको मृत्यु हुन्छ । उल्का नामको उपग्रह बसेको नक्षत्रमा विवाह भयो भने धन नाश हुन्छ । बज्र नामको उपग्रह बसेको नक्षत्रमा विवाह भयो भने उपर्युक्त कन्या परपुरुषसंग रमण गर्ने हुन्छिन् । कम्प नामको उपग्रह बसेको नक्षत्रमा विवाह भयो भने बसेको ठाउँ छोडेर बसाइँ जानुपर्छ । निर्घात नामको उपग्रह बसेको नक्षत्रमा विवाह भयो भने कुलको संहार गर्ने हुन्छिन् ।

बिद्युत्पुत्रविनाशंनिवेदयति पतिबधं झटिति शूलः ।
दशमदिनेसंन्निपातपत्युपघातं सदेवरंकेतुः ।
द्रव्यविनाशंचोल्का परपुरुषरतां करोति वज्राख्यः ।
कंपस्थानविनाशं कुलसंहारं तु निर्घातः ।

आफूले चाहेको उत्तमोत्तम समय अल्पकालमा पाउन सकिदैन । त्यसो हुनाले विवाह आदि मङ्गल कार्यका निमित्त धेरै प्रकारबाट प्रशस्त गुणलेयुक्त शुद्ध समय ठम्याउनु पर्छ । उपर्युक्त शुद्ध समय उपलब्ध भएका समयमा सानातिना अशुभयोगले कुनै प्रकारको हानि नोक्सानी गर्न सक्दैन । जस्तै– दन दन बलेको अग्निसमूहलाई सानातिना जलका छिटाले शान्त गर्न सक्तैन त्यस्तै प्रशस्त गुणलेयुक्त शुभसमयलाई सानातिना अशुभयोगले हानि गर्न सक्तैन ।

आचार्यले विवाह निश्चय भइसकेपछि कन्याले गर्नुपर्ने कर्तव्य निम्नप्रकार दर्शाएका छन् ।

कुसुम्भरक्ताम्बरभूषणोज्ज्वलाः साध्व्यःसुरूपाः सुभगाः कुलोद्भवाः ।
नदीं नयेयुः सरसोऽथवा तटं कन्यामलङ्कृत्यमहेन्द्रजायया ।।

विवाहका निमित्त लिइएका नक्षत्र, वार, तिथिमा कुमालेले घडा बनाउन ठीक पारेको माटाको सुयोग्य शिल्पीद्वारा इन्द्रपत्नी इन्द्राणीको मूर्ति बनाउनू । विशुद्ध कुलमा जन्मिएका पतिव्रता सौभाग्यवती स्त्रीहरूले छिपाले रातो रङ्गमा रङ्गाएको लुगा र गहनाले सजिसजाउ भएर कन्यालाई पनि सजाएर, इन्द्राणीको मूर्ति साथमा लिई कन्याका साथ नदी अथवा प्रशस्त जल भएका ठाउँमा जानू र शुद्ध पवित्र ठाउँमा इन्द्राणीको मूर्ति राख्नू । सबै सुवासिनीहरूले स्नान गरी सुन चाँदी तामा माटाका कलशमा माएसम्मका धान्य आदि बीज हालेर उपर्युक्त कलशको पूजा गरी तीनै कलशका जलले इन्द्राणीलाई स्नान गराई पूजा गर्नू ।

त्यसपछि उपर्युक्त सौभाग्यवती नारीहरूले प्रत्येक उपहार बलिदिने वस्तु नाङ्लामा राखेर पूर्व, दक्षिण, पश्चिम, उत्तर चारै दिशामा नाङ्लाले उपहार बलि दिनू । त्यसपछि कन्यालाई स्नान गराई नाना सुगन्धित मिसिएको बेसारको बास्नाले सुवासित गराएर रातो रङ्गको वस्त्र र गहनाले सुशोभित भएकी कन्यालाई इन्द्राणीको पूजा गर्न लगाएर दही, भात, घ्यू, मह मिलाएर इन्द्राणीलाई उपहार दिन लगाउनू । कन्याले हातमा फलामको चीज लिएर इन्द्राणीलाई साष्टाङ्ग प्रणाम गर्नू । त्यसपछि केश सम्याएर बलियो गरी बाँधेर हर्ष र उल्लासका साथ घरमा बाउनू । घरमा ल्याइएको उपर्युक्त इन्द्राणीको पूजा, कन्याले विहान, दिउँसो, बेलुका, विवाह समाप्त नभएसम्म तीनै काल पूजा गर्नू ।

विवाह लग्न लेख्ने व्यक्तिले विचार गर्नुपर्ने विषय निम्न प्रकारका छन् । जन्म लग्नदेखि द्वादश स्थानसम्मका १२ भावलाई ४ भागमा बाँडेको छ ।

(१) जन्मलग्न, पञ्चम, नवम स्थानलाई आत्मा भन्दछन् ।

(२) द्वितीय, षष्ठ, दशम स्थानलाई उपेक्षा भन्दछन् ।

(३) तृतीय, सप्तम, एकादश स्थानलाई पोषक भन्दछन् ।

(४) चतुर्थ, अष्टम, द्वादश स्थानलाई वध भन्दछन् ।

जस्तैः–

आत्मसंज्ञा लग्नमा विवाह भयो भने कन्या पतिकी प्राणतुल्य पियारी हुन्छिन् । उपेक्षा संज्ञालग्नमा विवाह भयो भने परित्यक्ता हुन्छिन् । पोषक संज्ञालग्नमा विवाह भयो भने पतिले संमानसाथ राख्दछ र समाजमा उचित आदर पाउदछिन् । वध संज्ञालग्नमा विवाह भयो भने पतिको मृत्यु हुन्छ अथवा स्वयं मर्दछिन् । उपर्युक्त चार प्रकारका लग्नको फल, उपर्युक्त विवाह गण, बलाबल, वरवधूको जन्मराशि, जन्मलग्नबाट विवाहलग्न दिन हुने नहुने विचार गरेर मात्र ज्योतिषीले हँ र न गर्नु पर्दछ । उनको हँ र न लेनै वरकन्याको अमृतमय हुनुपर्ने जीवन विषमय हुनजान्छ ।

यस प्रकार ज्योतिष शास्त्रले विवाहको समय तोकिदिन्छ र त्यसपछि विवाह संस्कार हुन्छ । वैदिक संस्कृति अनुसार विवाह साधारण मेलमिलाप मात्र हैन, अपितु विवाह धार्मिक संस्कार हो ।

विनीत–

देवीप्रसाद लंसाल

विवाहपटलम्

ॐ नमः सूर्याय

ब्रह्माजशङ्कररवीन्दूकुजज्ञजीवशुक्रार्कपुत्रगणनाथगुरूं प्रणम्य ।
यः सङ्ग्रहोऽर्कवरलाभविबुद्धबुद्धे रावन्तकस्य तमहं विवृणोमि कृत्स्नम् ।।

यच्छास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिर्ज्योतिषं
तस्योच्छित्ति भयात्पुनः कलियुगे संश्रित्य यो भूतले ।
भूयः स्वल्पतरं वराहमिहिर व्याजेन सर्वं व्यधात्
इत्थं यः प्रवदन्ति मोक्षकुशला स्तस्मै नमो भास्वते ।।

वराहमिहिरोदधौसुवहुभेदत्तोयाकुले ग्रहर्क्षगणयादसिप्रचुरतोयरत्नाकुलैः ।
भ्रमन्ति परितोयतो लघुधियोऽर्थ लुब्धा स्ततः करोमि विवृतिप्लवं निजधिया भ्रमतोत्पलः ।।

कानीह शास्त्रसंबन्धाभिधेयप्रयोजनानि भवन्तीत्युच्यते । को ब्रह्मा वेदेनिः सूतमिदं वेदाङ्गमिति संबन्धः । अनेन शास्त्रेण यः तिथि नक्षत्रलग्नग्रहकुण्डलिकायोगादीनां शुभाशुभत्व परिज्ञानं तदभिधेयम् । सत्पात्रे शुभविवाहदानादिहलोकपरलोक सिद्धिरिति प्रयोजनम् । किमभिरुवर्तैरित्यत्रोच्यते । सिद्धिः श्रोतृ प्रवृत्तीनां संबन्धेन गृह्यते । कल्पेऽस्मिन् शास्त्राधिकारोच्यते इति । द्विजस्यैव यतस्तेन षडङ्गो वेदोऽध्येतव्यो ज्ञातव्यश्च । कानि तान्यङ्गानीत्युच्यतेः—

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिम् ।
छन्दसा लक्षणं चैव षडङ्गो वेद उच्यत, इति ।।

सतामयमाचारो यः शास्त्रप्रारम्भेष्वभित देवता नमस्कारं कुर्वन्ति । तदयमप्यावन्तकाचार्य वराह द्विजो वराहमिहिरोऽर्कलब्ध वरप्रसादो ज्यातिः शास्त्रसंग्रहकृद्यात्राभिधानान्तरं विवाहपटलं चिकीर्षुरत्रैव विघ्नोपशान्तये, आदावेव तत्प्रधानं सर्वगतं भगवतं कामदेवं प्रणमति ।

अज्ञातमध्यान्तसमुद्भवाय सर्वात्मने सर्वगताय तस्मै ।।
प्रणम्य देवाय मनोभवाय खलीकृतं येन जगत्समग्रम् ।।१।।

अज्ञातेति । कन्यका यौवनास्थामित्ये तदन्तवाक्यम् । अस्याभिःसंबन्धो मनोभवाय कामाय प्रणम्य द्विजेन्द्रांस्तर्पयित्वा स मन्मथो मङ्गलनादधात्वेवमाशिकं दत्वा कन्यकांदद्यात् । अवयवार्थो व्याख्यायते । अज्ञात मध्यान्त समुद्भवाय, नज्ञातोऽज्ञातः, मध्यश्चान्तश्चसमुद्भवश्च ते, मध्यान्त समुद्भवा स्ते च नज्ञाता यस्यासावज्ञात मध्यान्त सम्भवः, तस्मै अविदितस्थितिविनाशोत्पत्तये । तथा सर्वात्मने सर्वेषामात्मा सर्वात्मा तस्मै सर्वात्मने । अथवा सर्वेषां आत्मनि देहे यस्य तस्मै सर्वात्मने सर्वशक्तये । तथा सर्वगताय । सर्वाङ्गतः सर्वगतः सर्वव्यापी तस्मै प्रणम्य नमस्कृत्य, देवाय, सुराय मनोभवाय । मनसश्चिन्ता सङ्कल्पोद्भव उत्पत्तिर्यस्य, येन भगवता समग्रं निरवशेषं जगत् त्रैलोक्यं, खलीकृतं खलीकारप्रापितं । क्रियाग्रहण कर्तव्यमिति । ननु च ब्रह्मादिषु सुरेषु सत्सु कथं कामदेवस्य नमस्कारः क्रियते । यावता चैव मूलमिदं पाणिग्रहणादिकं, अस्य च वक्तृत्वेन वा ब्रह्मा एव प्रधानं तत्कथं मनोभवस्य नमस्कारः क्रियते इति ।।१।।

भावबोधिनीः– जुन देवताको आदि मध्य अन्त (जन्म मरण र स्थिति) का विषयमा कसैलाई थाहा छैन । सारा प्राणिमात्रका आत्म स्वरूप भएर बसेका छन् । जसले संसारका प्राणिहरूलाई आफ्नो ईशारामा नचाएका छन, यस्ता कामदेवलाई म प्रणाम गर्दछु ।।१।।

तदर्थमाह

प्रजापतिर्मन्मथ एव यस्मात् कामाद्विना नप्रभवः प्रजानाम् ।।
महत्सु सूक्ष्मेषु च सोऽस्ति देवः सर्वात्मकः सर्वगतश्च यस्मात् ।।२।।

प्रजापतिरितिः– मन्मथ कामदेव एव प्रजापतिः । यस्माद्यतः कामाद्विना मन्मथ व्यतिरेकेण प्रजानां जन्तुनां उत्पत्तिरेव नास्ति । अतः स एव प्रजापतिः स्थिते च प्रजापतित्वे खलीकारतया प्रजापति शब्दवाच्यः, ब्रह्मणो नप्रणामः कृतः । नाप्यन्य देवताऽरूपस्य । यस्मात्सर्वात्मकः सर्वगतः स एव कामःसर्वात्मकत्वं सर्वगतत्वं कथमिति चे त्तदर्थमाह । महत्सु सूक्ष्मेषुच नास्ति भेद इति । महत्सु स्थूलरूपेषु हस्त्यादिषु सरीसृपादिषु स देवोऽस्ति विद्यते । अतः सर्वात्मकः सर्वगतश्च ।।२।।

भावबोधिनीः– कामदेव नै प्रजापति हुन् किनकि कामदेव विना सन्तान उत्पत्ति हुन सक्तैन । अतः प्रजापति स्वयं भएकाले र ब्रह्माकामाशक्त भएका हुनाले ब्रह्मालाई नमस्कार नगरेको हो र अन्यान्य देवताहरूलाई पनि नमस्कार नगरेको । कामदेव मनुष्य पशु–पक्षी कीट पतङ्ग आदिमा कुनै प्रकारको भेदभाव नगरी समानभावले रहेका छन् । जस्तै ठूलामा हात्तीदेखि सानामा कमिलासम्मलाई कामवासना उत्तिकै देखिन्छ, यसैले कामदेव समदर्शी हुनाले नै प्रथम प्रणाम गरेको हो ।।२।।

अथ पुनरपिविशेषमाह

यस्मात्परन्नापरमस्ति किञ्चि त्सौक्ष्म्यान्महत्वाचच यतश्चनान्यत्
तेनेदमेकेन मनोभवेन व्याप्तंजगच्छाङ्ग भूतेव सर्वम् ।।३।।

यस्मादितिः– यस्मात् मनोभवात् परं प्रकृष्टमपरमन्यं न किञ्चिदस्ति विद्यते । तस्मात्सौक्ष्म्यादणुत्वान्महत्वात्

स्थूलत्वा च्च यतो यस्मान्नाम्यवस्ति । स्थूल महद्व्रूपत्वाज्जगत स्तेन कारणेनेदंजगदेकेनैवं मनोभवेन कामेन व्याप्त-मावृतम् । केनेव शाङ्गंभृतेवेति । शाङ्गंभृद्भगवान् वासुदेवः शाङ्गंमिति भगवतः संबन्धिनोधनुषः संज्ञा । यथा शाङ्गंभृतो नारायणेनैकेनेव जगद्विश्वं व्याप्तं तथा मनोभवेन, शाङ्गंभृतेवेत्यनेन सर्वगतत्वमुक्तम् ।।३।।

भावबोधिनीः– यस निमित्त कामदेवभन्दा परमोत्तम देवता अरु कुनै छैनन् । किनकि सानामा कमिलादेखि ठूलामा अतिशय ठूलो भएका मनोभव साराप्राणिमा व्याप्त छन् । जस्तै शाङ्गंधनुषधारि भगवान् विष्णुले चराचर जगत् व्याप्त छ, त्यस्तै कामदेवले पनि व्याप्त गरेका छन् ।।३।।

खलीकृतं येन जगतसमग्रमिति यदुक्तं तदेव दर्शयति ।
अगम्यगामी भगवान् प्रजेशः श्रोणीसहस्राङ्क तनुश्चशक्रः ।
चतुर्मुखो येन कृतश्च शम्भु समन्मथो मङ्गल मादधातु ।।४।।

अगम्यगामीतिः- स मन्मथः काम मङ्गलं आदधातु करोतु । कीदृशो येन कामेन प्रजेशो भगवान् ब्रह्मा अगम्य-गामी अगम्य गमन शीलः कृतः । एवं हि श्रूयते पुरा शुम्भ निशुम्भाख्यौ द्वावसुरावतिबलोद्धतौ वरलब्धौ वभूवतु स्ताभ्यां सर्वेसुरा निर्जिता स्ततः सुरा स्तयोर्वधोपायं चिन्तयन्तः स्थिताः । तयोश्च न कस्यचित्सकाशान्मृत्युरस्ति । ततः सुरेश्वरः शक्तिज्ञातं, यथा स्त्रियं विना तयोर्व्यापादने नान्य उपायो ऽस्ति, ततो ब्रह्मणा सर्वासां लावण्ययुक्ताना मप्सरसां रूपं तिलमात्रं गृहीत्वा तिलोत्तमानाम्नी, अप्सरा उत्पादिता । ततः स कमल हस्तामति रूपान्वितां दृष्ट्वा तां दुहितरं तिलोत्तमांश्च कामेन एव अगम्यगामी प्रजेशः कृतः ।

श्रोणीसहस्राङ्क तनुश्च शक्र इति । येन च कामेन च शक्र इन्द्रः श्रोणीसहस्राङ्कतनुः कृतः श्रोणीसहस्रमङ्क शिचह्न तनोर्देहे यस्य श्रोणीसहस्राङ्कतनुःभगसहस्रचिह्नशरीरः संपादितः । एवं श्रूयते कदाचिद्गौतमाश्रमे तद्भार्यामहल्या मिन्द्रो ददर्श । तां दृष्ट्वा ततः स कामार्तो बभूव । ततः समित्कुशार्थं गौतमे गते । इन्द्रो गौतम रूपं कृत्वा तद्भार्यामहल्यां कामयामासः । ततः समित्कुशमादायाऽऽगते गौतमे संभ्रमवसादिन्द्रस्य माया विस्मृतः । ततोऽहल्या तमिन्द्रं गर्भस्थंमकरोत् । स च गौतम तस्मिन्नहन्येव योगविदा राज्ञा केनचिदुपनिमन्त्रितो भार्ययासह तदाश्रमान्तरे गतः । ततोऽन्येन योगवपुषा समुपलब्धेनेन्द्रागमनेनास्मै आसन त्रयमुपनीतम् । तं दृष्ट्वा गौतमः स विष्मयो बभूव किमेतत । भार्या द्वितयस्य मे आसनत्र यमुपनीतमिति । ज्ञातः स यः कोपेनावलोक्येन्द्रं रोषात्सहस्रभगो भवेति शशाप ।

चतुर्मुखो येन कृतश्च शम्भुरितिः– येन कामेन शम्भुर्भगवान् महादेवश्चतुर्मुखश्चतुर्वदनः कृतोनिष्पादित एवं श्रुयते यथा तिलोत्तमया स्वर्गमार्गादवतीर्णया भगवान् महेश्वरो दृष्टः । ततः सा भगवतो नमस्कारकरणार्थं भगवतः समीपमागता स हि तिलोत्तमां भ्रमन्तीं दृष्ट्वा प्रतिपार्श्वं पश्चाच्चान्यामुखत्रयं निर्ममे । उत्सङ्ग स्थिताया उमायाः क्रोधभया दिति ।।४।।

भावबोधिनीः– भगवान् ब्रह्मा कामातुर भएर अगम्य गामी भए । कुनै समयमा राम्रा–राम्रा अप्सराहरूको सौन्दर्यबाट तील बराबर सौन्दर्य लिएर ब्रह्माले तिलोत्तमा नामकी अप्सरा बनाए र आफ्नी छोरी तिलोत्तमाको सौन्दर्यमा मोहितभएर कामवासना शान्तगरेका हुनाले ब्रह्मा अगम्य गामी भए ।

जुन कामदेवका प्रभावले इन्द्रका शरीरमा हजार योनि भए । कुनै समयमा इन्द्र घुम्दै फिर्दै गौतमका आश्रममा पुगे र गौतम पत्नीको सौन्दर्यमा मुग्धभएका इन्द्र गौतम नभएका समयमा अहल्याको सतीत्व हरण गरेको थाहा पाएर तेरा शरीरमा हजार योनिचिह्न हुवस भन्ने इन्द्रलाई गौतमले शाप दिए ।

जुनकामदेवले महादेवलाई चारमुख बनाउन बाध्यगर्‍यो । कुनै समयमा तिलोत्तमा नामकी अप्सरा मर्त्यमण्डलतिर आउनलाग्दा कैलाशको बाटो गरी जाएकी हुनाले महादेवको दर्शन गर्न गयिन् । जता जता

तिलोत्तमा जान्छिन् उतै उतै फर्किएर हेर्दा काखमा बसेकी उमा रिसाउलिन् भन्ने भयले । जुन दिशातिर तिलोत्तमा जान्छिन त्यसै दिशातिर महादेवले मुख खडागरेको हुनाले शिवको चारदिशामा चार मुख भयो । अतः यसरी सबलाई नचाउने कामदेवले मङ्गल गरुन् ।।४।।

अथ शार्ङ्गभृतो विष्णोरपि खलीकरणमाह

भगवानपि शार्ङ्गरथाङ्गधरो भगवत्व मवाप यतः ।।
वहवोऽस्य भगा इति तेन कृतं भगवानिति नाम जगत्प्रथितम् ।।५।।

भगवानितिः- शार्ङ्गं धनुः रथाङ्गं चक्रं ते धारयतीति शार्ङ्गरथाङ्गधरो, भगवान् नारायणः सोऽपि भगवान्नित्येवं रूपं खलीकारं । यतो यस्मादवाप प्राप्तवान्, तत्कारणं शृण्वाकर्णय । बहवोऽस्य भगा इति । अस्य भगवतो बहवः प्रभूताच भगा यदा सन्ति इति हेतो स्तेन कारणेन जगत्प्रथितं जगत्प्रतीतं भगवानिति नाम कृतं भगा विद्यन्ते यस्याऽसी भगवान् इति ।।५।।

भावबोधिनीः — शार्ङ्ग नामको धनु र चक्रहातमा लिने भगवान् चक्रपाणि पनि कामदेवका वसमा परेर धेरै भग (स्त्रीहरू) संग्रह गर्ने भएकाले उनको भगवान् भन्ने नाम जगत्प्रसिद्ध भयो ।।५।।

एतदेवाऽऽख्यानकं चाऽऽत्मानं स्पष्टीकरोति

सीतावियोगेन बहुनि दुःखान्यप्राप्तानि रामेण सलक्ष्मणेन ।
तानीह संस्मृत्य कलौ सहस्राण्यष्टौ तथाष्टौच विवाहितानि ।।६।।

सीतावियोगेनेतिः — सीता वियोगेन जानकी यत्रकाले रावणेनाऽपहृत्य नीता तत्र तद्वियोगेन रामेण रामरूपेण भगवता विष्णुना सहलक्ष्मणेन स्वभ्रात्रा लक्ष्मणेन सहितेन बहूनि प्रभूतानि दुःखान्याप्तानि। तानि च दुःखानि इहास्मिन् कलौ युगे संस्मृत्य संविचिन्त्य वासुदेवरूपेणाऽष्टौसहस्राणि विवाहितानि परिणीतानि 'षोडस सहस्राणीत्यर्थः' । अतश्च बहुभगवत्वात भगवानिति ।।६।।

भावबोधिनीः — भगवान् विष्णुले रामावतारमा वनवासका समयमा रावणले सीताहरण गरिदिएकाले आफ्ना भाइ लक्ष्मणले र आफूले पाएको दुःख सम्झिएर । श्रीकृष्णावतारमा विष्णुले १६ हजार एक सय आठ स्त्रीहरूका साथ विवाह गरे । यसै कारणले उहाँलाई धेरै भग संग्रह गर्ने भनेको हो ।।६।।

शुभ तिथ्याद्यान्युत्तरत्र वक्ष्यति । तत्राऽऽशङ्कते किमर्थं शुभतिथ्याद्यपेक्षणमेव कन्या कथं नदीयते ।

तदर्थमाह

दुर्भगास्तनयवर्जिताश्च या निः स्वसन्ति वनिताः पतिव्रता ।
ताः कुदैव विनिपात यन्त्रिता नान्यजन्म जनितैः सुदुस्कृतैः ।।७।।

दुर्भगाइतिः- दुर्भगाः, अप्रिय पतयः भर्तुरवल्लभा, एवं विधा याः स्त्रिय स्तथा । याश्च तनय वर्जिताः पुत्ररहितास्तथा, याश्च वनिता स्त्रियः पतिव्रता भर्तृभक्ता अपि निश्वसन्ति दुःखं भजन्ते । नान्यजन्म जनितैः, प्रागजन्मनि जनितानि उपार्जितानि दुष्टकर्माणि स्वानि आत्मीयानि तैर्न तथा विधं भजन्ते । किं तर्हि कुदैव विनिपात यन्त्रिताः, कुत्सितो योऽसौ दैवो देवता (दैवज्ञ) सा तद्विनिपातो लग्नादि अभाव स्तद्विनिपातेन तत्सन्निपातेन यन्त्रिताः

पीडिता स्तथा विधाऽवस्था भजन्ते । तस्माच्छुभतिथ्यादि अपेक्षणीय मित्यर्थः ।।७।।

भावबोधिनीः- भाग्यहीन तथा पतिले नरूचाएका र सन्तान नभए र कष्टभोगीरहेका नारीहरूले मात्र दुःख भोगेका हुँनन्, पतिव्रता, पतिपरायणा नारीहरुले पनि कष्ट भोगीरहेका छन् । उपर्युक्त दुःख पूर्वजन्मको कमाईबाट प्राप्त भएको हैन । त्यसो नभए केले भोग्नु परेको होत ? अल्पज्ञ दैवज्ञहरूले लोभवस लग्न नभएका समयमा पनि लग्नदिएर खराव लग्नमा विवाह भएको हुनाले उपर्युक्त नारीहरुले नानाकष्ट सहनु परेको हो । त्यसैले शुभ तिथि शुभलग्नमा विवाह गर्नु पर्दछ भनेको हो ।।७।।

इदानीं कन्यादानविधिमाह

सुरभिकुसुमगन्धैः स्तर्पयित्वाद्विजेद्रान् शुभतिथिदिवसर्क्षे दैववित्संप्रदिष्टे ।
उभयकुलविशुद्धे ज्ञातशीलेसुरूपे प्रथमवयसि दद्यात्कन्यकां यौवनस्थे ।।८।।

सुरभिकुसुमेतिः- सुरभिणि सुगन्धीनि यानी कुसुमानि पुष्पाणि गन्धाश्चागरूकर्पूरकस्तुरिका चन्दनादीनि तैश्च सुरभिकुसुमगन्धैः द्विजेन्द्रान् ब्रह्मणश्रेष्ठान् पाठश्रुतसंयुक्तान् तर्पयित्वा प्रीणायित्वा । कथं सुरभिगन्धै-स्तर्प्यते । उच्यतेमन् मथोत्पत्तये, यतो देवतारूपमात्मानंकृत्वा देवपूजायामधिकार स्तदुक्तं विद्वान् यजेत् याजयेदिति । अन्यत्राणि शिवो भूत्वा शिवं जपेदिति । शुभतिथि दिवसर्क्षेति, शुभ तिथौ शुभदिने नन्दा भद्रा विजया पूर्णा संज्ञिते यावद्रिक्ता संज्ञा तिथयो न शुभा । तथा दिवसे शुभे दिवस ग्रहणेन वार उच्यते । पापग्रह वर्जिते शुभदिवस इत्यर्थः । ऋक्षे नक्षेत्रे च शुभे वैवाहिके निरूपहते । कीदृशे दैववित्संप्रदिष्टे, दैवविदा ज्यौतिष शास्त्रज्ञेन संप्रदिष्टे उक्ते । कीदृशे पुरुषविशेषे कन्यकां दद्यादित्याह । उभयकुलविशुद्धे वंशे मातृक पैतृक विशुद्धे निरवद्ये यस्य कुलद्वयाऽप्रविष्ट सङ्कुरे तथा भूते । ज्ञातशीले विदित चरित्रे सुरूपे सौन्दर्यादिगुणोपेते । प्रथम वयसि तारुण्ययुक्ते नव वयसि यौवनस्थे कन्यकां दद्यात् । यौवनस्थ इति ग्रहणं बालत्व प्रतिषेधार्थम् । नमोऽस्तु देवायेतिः-पाठान्तरे अपरा व्याख्या अभिप्रेत देवता नमस्कार पूर्विका क्रियारम्भ इति सतामाचारस्तमनुवर्ते, आचार्य । अज्ञाते-त्यादि तस्मै मनोभवाय कामाय नमोऽस्तु नमस्कारो भवतु । विशेषणानि पूर्ववत् । खलीकृतमिति तदासिद्वरिणाह । अगम्यगामी भगवानित्यादि । आबधातु करोतु शेषं पूर्ववत् । अत्र कन्यादानेऽन्य प्रश्नलग्न पूर्विकां क्रियामिच्छन्ति । तथा च भगवान् वात्स्योमुनिः-

कन्यादानं शचीयागो विवाहोऽथ चतुर्थिका ।
जारकल्पं च निर्दिष्टा विधयः पञ्चसूरिभिः ।।
तत्क्रियायाः शुभंकालं दैवज्ञो निर्दिशेत्सदा ।
विदित्वा प्रश्नसमयं दम्पत्योर्भाग संमतम् ।।
दैवज्ञस्य हि देवेन सदसत्फलवाञ्छकः ।
अवशोऽपि जन, सर्वं वसंसमुपनीयते ।।
अतः सुसूक्ष्मया बुद्धया विचार्य फलमादिशेत् ।
दैववित्सदतश्रष्टा ज्योतिर्ज्ञानस्यपारगः ।।

पूर्वाण्हे श्वेतमाङ्गल्यफलपुष्पकरो यदि ।
पूर्वाशाऽभिमुखं पृच्छे तस्य कल्याणमादिशेत् ।।
भूमौमनोरमायाञ्च स्पृष्ट्वा पृच्छेत्कदाचन ।
मङ्गलानि च दृश्यन्ते तथापि शुभमादिशेत् ।।
चतुष्टयत्रिकोणस्थौ सुराचार्यशशाङ्गजौ ।
आयुःपुत्रार्थं दातारौ दम्पत्यो नात्रशंसयः ।।
प्रश्नलग्नस्य भावानां सूत्र्यादीनां च वृद्धिदौ ।
नृलग्नशुभसंयुक्तो मानुषारव्यांशकोऽपिवा ।।
मूर्तिस्थो शुभसंयुक्तो मानुषारव्यांशकोऽपिवा ।
प्रश्ने तदा विजानियाद्दम्पत्यो: सुखसंपदम् ।।
जन्मराशि भवेल्लग्न स्तत्स्वामि वाथ पृच्छतः ।
त्रिषष्ठायगृहे वास्या त्तदापिकुशलंवदेत् ।।
जामित्रवर्ज्य केन्द्रेषु भृगुपुत्रे व्यवस्थिते ।
त्रिकोणके विनिर्देश्यं पृच्छकस्यापि मङ्गलम् ।।
उद्वाहसमये नान्यत्समं ब्रूयाच्छुभा शुभम् ।
एवं परीक्ष्य दातव्या पित्राकन्या सुलक्षणा ।।
वरायगुणिने शस्तै र्युक्तायनरलक्षणैः ।
विवाहे यान् प्रवक्ष्यामि युक्ताच्च तिथिवासरान् ।।
शुभास्तेष्वेव दातव्या कन्यां दैवविदाज्ञया ।
पूजयित्वा वरान्विप्रान् यथावत् विधिपूर्वकम् ।।
हुत्वाग्नि दिनपूर्वाण्हे कृत कौतुक मङ्गला ।
कुसुम्भरक्तवसना श्वेतमाल्यानुलेपना ।।
भूषिता भूषणैः सर्वै दैवविप्राग्नि सन्निधौ ।
कन्याह वेदध्वनिभिर्वाद्यशंखादि निःस्वनै ।।
विवृद्ध मङ्गलगुणै र्विधेया कन्यका नरः ।
कन्यावरणमिच्छन्ति विवाह सदृशं बुधाः ।।
विशेषोऽत्र तदेवैको विलग्नं नेषते यतः इति ।

तथा च शौनकमुनिः–

शुभाशुभ फलयोगे यद्वक्ष्यते च दम्पत्त्योः ।
तानधुना वक्ष्यामि पृच्छकलग्ना द्विशेषफलम् ।।
पृच्छकलग्नाच्चन्द्रो यद्यष्टमषष्ठगो भवति ।
तस्यादेश्यंमरणं विवाहिताऽष्टमेवर्षे ।।
यदुदयस्थः क्रूर तस्मादपि सप्तमो यदा पापः ।
सप्तभि रब्दैर्मरणं विज्ञेयं तस्य पुरुषस्य ।।
यदि उदयस्थ श्चन्द्र स्तस्मादपि सप्तमो यदा भौमः ।
मासाष्टकंजीवति विवाहकालात्परं पुरुषः ।।
पृच्छक समीपदेशे तिष्ठत्यथ भिक्षुकोऽथवा लिङ्गी ।
तल्लिङ्गं शोवर्षे भवत्यवस्यं दशाभिरेव ।।
श्वशृगालो लूकरवो महिषोष्ट्राजाविका निनादो वा ।
तस्योद्वेगं कलहं प्रवास मरणञ्च निर्देश्यम् ।।
कृकलासवानरोरगगर्धव संश्लेषणं यदि कथञ्चित् ।
दैवाच्च पृच्छकानां कन्यानेकत्र सारमते ।।
भिद्यति यद्युदककुंभं शयनाऽऽशनपादुकादि भङ्गोवा ।
पृच्छाकाले यस्या स्तस्या वैधव्य मादेश्यम् ।।
उदयास्तम वा भृगुतनये शशाङ्कपुत्रे वा ।
वैधव्यं क्षितितनयसप्तमे कन्यका म्रियते ।।
दृष्ट्वा निमित्त वर्गं नीचोच्च विधि च जामित्रम् ।
कथयति यच्चोद्वाहे पृच्छाकालेऽपि तत्सर्वम् ।।
वृषभो रथो गजो वा शङ्ख पद्मध्वजोऽथवा छत्रम् ।
सर्पति यस्य प्रश्ने सोत्तमा याति गोत्रस्य ।।
पृच्छक वर्ण त्रितयं समीप माश्रित्य तिष्ठते छागः ।
तस्याऽऽदेश्ये विदुषा यदा तदा यज्ञ भागित्वम् ।।
यदि पृच्छक लग्नस्थौ गुरुसौम्यौ दीर्घजीविनं कुरुते ।
पञ्चसंख्यका पुत्रा जामित्र गतो घनं विपुलम् ।।
सर्पति यदा कुमारी समीपगा पृच्छकस्य मुक्तभया ।
सा कन्या स्त्रीजननी विगतभया चेति वक्तव्या ।।

वादित्र तूर्यघोषै र्वीणा वेणु ध्वनिगतरवो वा ।
शङ्खस्वनः प्रशस्तं पृच्छाकाले कुमारीणाम् ॥
एवं कुमारकाणां पृच्छकदेशे गुणाश्च वक्तव्याः ।
वैशील्यश्च यथा धै वैधव्यं च प्रजाराहित्यम् ॥
दृष्ट्वा निमित्तवर्णं नीचोच्च विधिश्च जामित्रम् ।
कथयति यदुद्वाहं तस्य न मिथ्या भवेद्वाणी ॥
दृष्ट्वा निमित्त वाग्यैः कथयति यौगैः पुराकृतं कर्मः ।
तस्य यमो विस्तरते विमलेऽम्भसि तैल बिन्दुरिव ॥
कथयति यथा निमित्तैः पुरुषस्य शुभाशुभानि ।
गुणदोषैः कन्यास्वपि कर्मफलैः सम्यक्प्रोद्भाषित
निमित्तैः ॥
एवं निमित्त शुद्धां वरयेत्कन्यां यवीयसीं पुरुषः ।
दैवज्ञमुखात् ग्राह्यं सिद्धिस्त्वधिगम्य नियमेन ॥
दैवज्ञेनापि ततो होरा तन्त्रऽवगाहके कन्या ।
ज्ञातबालाभालाभौ निराकुलेनैव वक्तव्यम् ॥
लग्ना त्तृतीय सप्तम पञ्चम कर्मायगो निशानाथः ।
जीवेन दृष्टमूर्तिः सम्पत्ति करस्तु दम्पत्त्योः ॥
वृषभतुलाधरकर्की सितेन चन्द्रणे वीक्षितो वापि ।
संपृच्छतां नराणां कन्यालाभो ऽस्ति नियमेन ॥
युग्मगृहे शशिशुक्रौ द्विपदाख्ये स्त्रीनवांशके बलिनौ ।
उदयमवलोकयन्तौ यदा तदा कन्यका लाभः ॥
प्रमदांशक द्रेक्काणे वणिजो यद्विघ्नमायातः ।
दृष्टः शुक्रेन्दुभ्यां कन्यालाभं समादिशति ॥
प्रमदा भवति विशिष्टा पश्यन्ते यद्विलग्नमायातम् ।
योषिद् गृहैकदेशे वनितालाभं तदा ब्रूयात् ॥
एवं तु कन्यास्वपि पृच्छाकाले वरोपलब्धिः स्यात् ।
द्रेष्काणे च नवांशयुक्ते पुरुषग्रहे बलिभिरिति ॥

यद्येवं मुनिभिरुक्तं तदा ऽऽचार्येण कस्मान्नोक्त मित्यवोच्यते । आचार्येणोक्तं पूर्वमेव जातके । "उद्वाहे वरणविधौ प्रदानकाले चिन्तायामपि सकलविधेयमेतदिति ।" पुनरुक्तस्त्वाविहृनोक्तम् । एवं

प्रथम प्रश्न फलंज्ञात्वा ततः कन्यादानं कुर्यात् । उभयकुल विशुद्ध इत्यत्र केचित् सप्तमीमिच्छन्ति, अथवा संप्रदा नेश्वचिदपि सप्तमीत्युच्यते ।

तथा च
शर्मणे ब्राह्मणे दानं द्विगुणं ब्राह्मणे ब्रुवे ।
प्रधीते शतसाहस्रमनन्तं वेदपारग इति ।।
तथा च
स्वगार्थं ब्राह्मणे दानं यशोऽर्थं नटनर्तके ।
संग्रहार्थं च भृत्येषु भयार्थं पुनराजनीति ।।८।।

भावबोधिनीः– वास्नाआउने फूल अत्तर–कपूर कस्तुरी आदिले सुगन्धित पारेको चन्दन आदिले ब्राह्मणहरूको पूजा गरेर, रिक्ता तिथि र पापग्रहका वारलाई त्यागेर, शुभतिथि शुभ वारमा बिवाहमा विहित नक्षत्रमा, ज्योतिषिले दिएको शुभ मुहुर्तमा, मातृकुल तथा पितृकुल दोषरहित छ र जसको शीलस्वभाव आफुले जानेको छ साथै सुन्दर पनि छ भने कन्याले यौवनावस्थामा प्रवेश गरेपछि विवाह गरि देओस । तर बालविवाह न गरोस ।।८।।

अधुना शचीयागादि पूर्विकामितिकर्तव्यतामाह
पुण्ये दिवसेऽथवा क्षणे वैवाहचेषु च भेषु कारयेत् ।
घटकारमृदा सुलक्षणा मिन्द्राणीं कुशलेन शिल्पिना ।।९।।

पुण्ये दिवस इत्यादिः– इन्द्राणीमिन्द्र भार्यां शचीयागं कारयेत् । कदा पुण्यदिवसेऽथवा पुण्ये प्रशस्ते निरुपहते दिवसे क्षणे मुहूर्ते वा पुण्ये प्रक्षण योगयोर्युक्त्वा ।

तथाच
शिवभुजगमित्रपितृवसुजलविश्वविरिञ्चि पङ्कज प्रभवः ।
इन्द्राग्नीन्दुनिशाचरवरुणयमयोर्नय श्चाह्निः ।।
रुद्राजाहिर्बुध्न्यपूषादस्रान्तकाग्नि धातारः ।
इन्द्रादितिगुरुहरिरवित्वष्ट्रा निसाख्या क्षणरात्रौ ।।

अह्नः पञ्चदश रात्रौ चैवं मुहूर्त इति संज्ञा सच विज्ञेय स्तज्ज्ञैश्छाया यन्त्राम्बुभिर्युक्तेति । एवं क्षणैर्वा पुण्यै स्तत्र च वैवाहेषु च भेषु विवाह योगेषु वक्ष्यमाणेषु भेषु नक्षत्रेषु तत्र दिने वैवाहिकं नक्षत्रे भवति । वैवाहिके नक्षत्र मुहूर्ते वा अनुकूले घटकार मृदा कुम्भकार मृत्तिकया कुशलेन प्रवीणेनाऽभिज्ञेन शिल्पिना तत्कर्त्रा । कीदृशीं प्रतिमा लक्षणसंयुक्तामित्यर्थः ।।९।।

भावबोधिनीः– शुभदिन वा शुभमुहूर्तमा विवाहमा लिइएका नक्षत्रमा कुमालेले तम्यार पारेको माटो ल्याएर

शिपालु कालिगढद्वारा सर्वलक्षणले सुसम्पन्न भएको इन्द्राणीको प्रतिमा वनाओस् ।।९।।

अनन्तरं किंकुर्यादित्याह

कुसुम्भरक्ताम्बरभूषणोज्ज्वलाः साध्व्यः सुरूपाः सुभगाः कुलोद्भवाः ।
नदीं नयेयुः सरोऽथवा तटं कन्यामलङ्कृत्य सहेन्द्र जायया ।।१०।।

कुसुम्भरक्ताम्बरेतिः– साध्व्यः सच्छीलाः स्त्रियः कन्यांकुमारी मलङ्कृत्य भूषयित्वा इन्द्रजायया पुरन्दरभार्यया शच्या सहसार्द्धं नदीं सरितं सरसोऽथवा बहूदकस्थलस्य तटे तीरे नयेयुः प्रापयेयुः । किं भूता स्ताः साध्व्यः इत्याह । कुसुम्भरक्ताम्बर भूषणोज्ज्वला इति महारञ्जक रञ्जितानि जात्यम्बराणि भूषणालङ्करणानि हार केयूर कटक प्रभृतीनि तैरुज्ज्वलाः शोभिताश्च या स्तथा साध्व्यः पतिव्रता सुरूपाः सौन्दर्यादि गुणोपेताः सुभगा भर्तृ बल्लभाः कुलोद्भवाः कुलीनाः सत्कुलप्रसूता इत्यर्थः । ततः किं कुर्यादित्याह । शस्ते प्रदेशे पुरुहूत पत्नीं संस्थाप्य साध्व्योः विभवानुरूपैः भक्षैः विचित्रैः सफलाज्यलाजैः संस्नापयेयुः कलशैः सबीजैः ताः साध्व्यः शस्ते प्रशस्त लक्षणे निरुपहते प्रदेशे स्थाने, विभवानुरूपं ऐश्वर्यानुसारेण भक्षैरपुपादिभिः विचित्रै नानाप्रकारैः सफलज्यलाजैः सह श्रीफल जातीफल पुगफलादिभि राज्येन घृतेन लाजादिभिर्या भक्ष्या विचित्रा वर्तन्ते तै रूपलक्षिते स्थाने पुरुहूतपत्नीमिन्द्रभार्यां संस्थाप्य स्थापयित्वा ततः कलशैः सौवर्ण रजत मृण्मयैर्वा स्नापयेयुः । किं भूतैः कलशैः सबीजैः बीजै र्धान्यदिभिः सह ये वर्तन्ते तै स्तथा भूतैरिति ।।१०।।

भावबोधिनीः– रञ्जितकारले रङ्गाएका रात्रा–रात्रा वस्त्रआभूषणले सजिसजाउ भएका पवित्र कूलमा जन्मिएका पतिव्रता सौभाग्यवती महिलाहरुले इन्द्राणीको प्रतिमाका साथ साथै कन्यालाई गहना वस्त्र आदिले शिंगारेर नदी अथवा प्रशस्त जल भएका ठाउँमा लैजानु । शुद्ध पवित्र ठाउँमा उपर्युक्त प्रतिमा राखेर सौन्दर्यवती स्त्रिहरुले आफ्नो वैभव अनुसार इन्द्राणीको पूजा गरेर नाना प्रकारका भक्ष्यभोज्य फलफूल आदि नैवेद्य चढाउनु । नाना प्रकारका धान्यादि बीजले युक्त भएका सुन चाँदी, तामा र माटाका कलशका जलले स्नान गराउनु ।।१०।।

कन्यकां शचीसकाशं स्थापये दित्याह

सूर्पेणदिक्षु प्रमदाबलिं ता दत्वा सकालीयक गन्धदिग्धाम् ।
कुसुम्भरक्ताम्बर वेष्टिताङ्गीं शचीसकाशं प्रमदा नयेयुः ।।११।।

सूर्पेणेतिः– ताः प्रमदाः स्त्रिय दिक्ष्वाशासु सूर्पेण तदाख्येन (नाङलो) भाण्डविशेषेण बलिमुपहारं दत्वा क्षिप्त्वा अनन्तरं कन्यकां शचीसकाश मिन्द्राणी निकटं ताः प्रमदाः साध्व्यो नयेयुः प्रापयेयुः । कीदृशीं कन्यां सकालीयकगन्धदिग्धां सकालीयकेन हरिद्रया ये गन्धाश्चन्दनागरुकर्पूरकस्तूरिका प्रभृतयस्तैर्दिग्धां लिप्तां तथा कुसुम्भ रक्ताम्बर वेष्टिताङ्गीं कुसुम्भेन महारजकेन रक्तानि रञ्जितानि यान्यम्बराणि वस्त्राणि तैर्वेष्टितान्यङ्गान्यवयबानि यस्या स्तां लोहित वस्त्र प्रावृतशरीरा मित्यर्थः ।।११।।

भावबोधिनीः– उपर्युक्त रीतिले स्नान गराएर सौभाग्यवती महिलाहरुले इन्द्राणीलाई नाङलाले चारैदिशामा बलि दिनु पर्दछ । त्यसपछि उपर्युक्त साध्वीहरुले हलेदाको रङ्ग र त्यसको वासनाको साथै नाना सुगन्धि चन्दन लेपन गरेकी तथा छिपाले रङ्गाएका वस्त्रले सुसज्जित भएकी कन्यालाई इन्द्रपत्नीको पूजा भएका स्थलमा ल्याउनु पर्दछ ।।११।।

ततः किंकुर्यादित्याह

दध्योदनेन हविषा मधुना च कन्या संपूज्य शक्रदयितां च सलोहस्ता ।
तूर्णीं प्रणम्य शिरसा गृहमेव याया द्देवीं प्रगृह्य मुदिता नियतैश्चकेशैः ।।१२।।

दध्योदनेनेतिः– अनन्तरं साकन्या कुमारी शक्रदयितां शचीं संपूज्य अभ्यर्च्य तामेव देवीं भगवतीं शचीं गृहीत्वा गृहमेव वेश्मनि यायात् गच्छेत् । केन संपूज्य दध्योदनेन दधिमिश्रितेनोदनेन भक्तेन हविषा घृतेन मधुना माक्षिकेन च । किं भूता कचा सलोहहस्ता, लोहेन कृष्णायसेन सहितो हस्तः पाणिर्यस्या स्तथा तूर्णीं अवाग्भूत्वा शिरसि मूर्ध्ना प्रणम्य नमस्कृत्य कायेन च । तथा कीदृशी कन्या मुदिता हर्षिता तथा नियतैर्बद्धैः केशैः रूपलक्षिता ।।१२।।

भावबोधिनीः– त्यसपछि हातमा फलामको कुनै वस्तु विशेष लिएकी कन्याले इन्द्राणीको पूजा गरेर दही, भात, घ्यू, मह आदि बलि उपहार चढाएर एक हातमा फलामको वस्तु विशेष लिएर मौन धारणा गरेकी कन्याले इन्द्र-पत्नीलाई साष्टाङ्गदण्डवत् गरेपछि कपाल सम्याएर बलियो गरि बाध्नु र हर्ष उल्लासका साथ इन्द्राणीको प्रतिमा सँगसँगै घर जाओस् ।।१२।।

ततः स्वगृहेस्थिताया शच्या किं कुर्या दित्याह

गृहेस्तितां तां पुरुहूतपत्नीं प्राङमध्यास्तमयेषु कन्या ।
स्रग्गन्ध धूपैः प्रतिपूजणेच्च पाणीग्रहं यावदुपागतेति ।।१३।।

गृहेस्थिता मितिः–तां पुरुहूतपत्नीं मिन्द्र भार्यां शचीं गृहे वेश्मनि स्थितां सा कन्या कुमारी प्राङमध्यास्तमयेषु प्रावसंध्यायां प्रभाते मध्यसंध्यायां मध्याह्ने ऽस्तमये सूर्यास्त समये एतेषु कालेषु स्रग्गन्ध धूपैः स्रग्भिर्गन्धैरगुरु चन्दन कर्पूर कस्तूरिकादिभिः धूपैश्च गुग्गुलु प्रभृतिभिः प्रतिपूजयेदर्चयेत् यावत् पाणिग्रहं विवाह मुपगता प्राप्तेति ।

अत्र च भगवान् वात्स्योमुनिः–

अतः परं निवोधेदं शचीयाग विधिं शुभम् ।
प्रशस्त तिथि नक्षत्र मुहूर्त दिवसेष्वथ ।।
वैवाहिकेषु कौलालीं मृदमाहृत्य यत्नतः ।
कारयेद्देवराट्पत्नीं रूपयुक्तां सुशिल्पिना ।।
ततः साध्यः शचीवाग्य कुसुम्भोज्ज्वलिताम्बरा ।
स्वलङ्कृता मलङ्कृत्य कन्यकां कृतमङ्गलाम् ।।
नयेयुः सरस्वतीरं सहशच्याऽथवा तटम् ।
निम्नगायाः शुचौदेशे मनोज्ञे शक्रयोषिताम् ।।
प्रस्थाप्य स्नापयेयुस्ता बीजौषधि समन्वितैः ।
जलपूर्णै र्नवैः साध्व्यः कलशै र्हेम राजितैः ।।

स्नापयित्वार्चयेत्पश्चाद्गन्ध माल्यानुलेपनैः ।
भक्षैश्चित्रैः फलैराज्यै र्लाजामिश्रैर्बलिं ततः ॥
सूर्पकोटिपरिक्षिप्तै र्दत्वा दिग्भ्यो बलिं ततः ।
स्नापयेयु स्ततः कन्या स्तथैव कलशैश्चतैः ॥
कालीयकानुलिप्ताङ्गीं वद्धकेशीं सुमङ्गलाम् ।
वद्धप्रतिशरां कन्यां कौसुम्भांबर संवृताम् ॥
शच्याः सकाशं प्रमदा नयेयु मौनमास्थिताम् ।
ततः प्रणम्य सा कन्या वाग्यता सुरराट् प्रियाम् ॥
दध्यौदनेन हविषा तां देवीं पूजयेदथ ।
ततः प्रणम्य तां देवीं कन्या हस्तेप्रगृह्य च ॥
लोहहस्ता गृहं गच्छेत्संहृष्टा मौनमास्थिता ।
गृहे स्थिता शक्रपत्नीं विधिवत्सवनत्रये ॥
पूजये द्गन्धयाल्यां लैरापाणी ग्रहणात्सदेति ॥

तथा च शौनकमुनिः-

सुभगां तथेन्द्रपत्नीं घटकारमृदा सलक्षणावयवाम् ।
शस्ते वैवाहिक भे विर्निर्मितां लेपकारेण ॥
निरुपहतरक्तवस्त्रां सुगन्धालक्तक प्रतिसराभिः ।
तामभिलिप्य तथान्यै र्गन्धैश्चाविघ्न विजयपरैः ॥
साध्व्यः सुरूपवेषाः कुलोद्गतकन्यकां पुरस्कृत्य ।
सरसः सरित्तटं वा नयेत पत्नीं सुरेशस्य ॥
स्वस्तिकलाजालापिक दध्यक्षत यावकै स्तथा कुसुमैः ।
फलसुरभि गन्धधूपै र्धृतदधि गुडपायसै श्चापि ॥
इष्ट्वा तामपि साध्व्यः स्नापयेयुः कन्यका शुभैः कलशैः ।
सहिरण्यौषधि गर्भै रकृष्णमूलै रविछ्वस्तैः ॥
लोहकटकाङ्गुलीयक सिद्धार्थकरोचना विजयैः ।
गन्धैः कालीयकागुरुयुतैः कृतक्षमानीयते पुरतः ॥
साध्व्यः शचीसकाशं गत्वा चरणौ तु पूजयेत्कन्या ।
दध्योदनेनहविषा प्रणम्य सितकुसुमगन्धैश्च ॥

सर्वाष्वाशासुबलिं दत्वा सूर्पेण चाम्बु संस्कृत्य ।
उद्धृत्य शक्रपत्नीं गृहं नयेयुः स्त्रियः सुमनः ॥
शस्ततरुपल्लवां वरधिचित्र कुसुमोपहार हारफलम् ।
रम्यै र्मङ्गलगीतध्वनिभिः स्थाप्या गृहेदेवता नियमे ॥
तस्या श्चरणाब्ज युगं त्रिसंध्य मर्चये त्ततः कन्या ।
सुरभिकुसुमै रक्कृष्णै र्यावत्पाणिग्रहंप्राप्य ॥
धनसंपत्सौभाग्यं पुत्रार्थ ज्ञाति सुखमवैधव्यम् ।
गच्छत्यचिरेणैन्द्रीं स्त्रीणामभिपूजिता सम्यगिति ॥१३॥

भावबोधिनीः– उपर्युक्त प्रकारले इन्द्रायणीको मूर्ती घरमा ल्याएपछि ती कन्याले चन्दन अक्षता धूप–द्वीप आदि षोडशोपचारले जबसम्म कन्यादान हुंदैन तबसम्म बिहान मध्याह्नमा र सायङ्कालमा भक्तिपूर्वक पूजा गर्नु पर्दछ ॥१३॥

इदानीं स्थलद्वारेण स्त्रीप्रवृत्तिमाह
रत्नानीन्दुकरः स्रजः शुभगता हर्म्योत्पलान्यासवः
तांबूलं प्रवराम्बराणि रुचिरं गीतं विभूत्यश्चया ।
यस्मान्न स्त्रियमन्तरेण हि नृणां सर्वाण्यभिप्रीतये
तस्माद्वच्मि तदाप्ति योग्य समयो धर्मार्थकामाय च ॥१४॥

रत्नानीन्दुकराइतिः—पुरुषाणां नाभिप्रीतये भवन्ति तुष्टिं नकुर्वन्ति । तस्मात् तदाप्ति योग्य समय तदाप्तौ स्त्री प्राप्तौ लाभेयोग्य मनुरूपो यः काल तदाप्ति कथयामि । तदाप्ति योग समय मित्यनुपाठे तदाप्ति रुपो यो योगः संबन्ध स्तस्य समय मिति व्याख्येयं । रत्नानि मणिविशेषाणि मरकत पद्मराग मुक्ताफल बज्र प्रमृतीनि । इन्दुकराश्चद्ररश्मयः स्रजो माला शुभगता सौन्दर्यादिगुणयुक्तत्वम् हर्म्यं गृहं उत्पलानि कुवलयानि उत्पलग्रहणं उपलक्षणार्थम् । अन्यन्यापि मदकराणि चम्पक प्रमृतीनि कुसुमानि, आसवं पानं मध्वादि ताम्बूलं प्रसिद्धम्, प्रवराम्बराणि प्रधान वस्त्रानि, तथा रुचिरं रमणीयं मधूरं गीतम्, अन्याश्च नानाप्रकार प्रमृतयः हस्त्यश्व रथ पदाति प्रभृतयः । किमर्थं समयं बेद्मि । धर्मार्थ कामाय च, धर्मोब्राह्मण पूजनादि, अर्थो धनार्जनं कामः सुरतम् । धर्माद्यर्थं वो युस्माक मिति । अत्र फलद्वारेण धर्मस्याधिस्यानी देवतानां संकीर्तनं धारणं विवाहशास्त्रादौ नमस्कारः करणीय स्ततः परं कन्यादान शचीयागावुक्तौ अधुना विवाहपटलश्च यः, जातकस्य व्ययेक्षमुद्वाहः ।

तथा च भगवान्वसिष्ठः–
विदित्वा जातकंपूर्वं कन्यायाश्च वरस्य ।
विवाहसमयोयोग्यःप्राक्समुत्थेन कर्णणा ॥

तथा च आचार्यएवाहः-

उद्वाहे वरणविधौ प्रदानकाले चिन्तायामपि सकलंविधेयमेतत् ।।

यात्राप्रकरण सव्यपेक्षमप्युद्वाहस्तथा च रणभिक्षुराहः--

तिथिकरण ग्रहदिवसा यात्रावत्कश्चिदेवतु विशेषः।

चन्द्रदिनेशसपत्नमाहुःकेचित्स्थिरांसौरे ।।

अत्र केचिद्विवदन्ते यदि समयादि जन्मसमयादेवेदम् । जीवित मरणं शुभाशुभं लाभादिकमवगतं, तथोद्वाह प्रकरण निर्देशेन न किञ्चित्प्रयोजन मित्यत्र पूर्वपक्षम् ।।

भावबोधिनीः- पुरूषका निमित्त नानाप्रकारका मणि-माणिक्य, कामोत्पादक चन्द्रमाका किरण, उत्तम उत्तम सुगन्ध युक्तमाला, अत्यन्तमनोहर घर कमल फूलेका पोखरी, विविध प्रकारका आसव, पान, उत्तमोत्तमवस्त्र, कामोद्दीपन गराउने संगीत कामवासना वढाउने खानपान, हात्ति, घोडा आदि सवारी आदि जति सुकै उपभोगका सामग्री भएतापनि धर्मपत्नी विना मानसिक सन्तुष्टि हुँदैन । अतः स्त्रीप्राप्त भएपछि लौकिक सुखका निमित्त धनोपार्जनको उपाय, वासना तृप्तिका लागि कामशास्त्रमा वताइएका साधनहरु र त्यसबाट वैराग्य उत्पन्न भएपछि धर्मानुष्ठान उपर्युक्त तीनै कुरा स्त्रीप्राप्तभए पछि मात्र उपलब्ध हुन्छन् । स्त्रीलाभको समय कहिले आउँदछ त्यसको बिवेचना गर्दछु ।।१४।।

स्वसिद्धान्तंचाऽऽचार्योपरिवद्धमाह्नः

उक्तंजन्मनियत्तदेव भविता यद्यङ्गनानांफलम् ।

व्यर्थोनत्वयमादरं परिणयेतत्काल लग्नादिगः ।।१४।।

उक्तंजन्मनीतिः- स्त्रीणां यच्च शुभाशुभं फलमेव जन्मनि जातकेतुउक्तं कथितम् । तदेव यदि चेद्भविता भविष्यति तत्त्वार्थो निःप्रयोजनः । परिणये विवाहे नत्वयमादरोऽभिनिवेश स्तत्काल लग्नादिगःविवाहकाले लग्नः आदि ग्रहणात् नवांशक ग्रहकुण्डलिका योगफलादिकः य आदरः सव्यर्थो जातकस्यैव फलदायकत्वात् ।।१४½।।

भावबोधिनीः- नारी जातीहरुको भूत, भविष्य, वर्तमान आदिको फल जे जस्तो हुनु पर्दछ त्यो सबै जन्मकालिक कुण्डलिकाबाट नै हुन्छ भन्ने कुरो जातक ग्रन्थमा पहिले नै लेखिसकेको छ । त्यसै विषयको उल्लेख फेरि विवाह समयमा लग्नफल, नवांशफल, द्रेष्काणफल आदिको उल्लेख गर्नु पर्ने कुनै कारण देखिदैन अपितु उपर्युक्त विषय पुनः यहाँ उल्लेख गर्नु नै व्यर्थ हुन्छ ।।१४½।।

एवं पूर्वपक्षमुक्त्वाऽधुनास्वसिद्धान्तमाह

अज्ञातं प्रथमं प्रधानमपरं तद्व्यञ्जकं योषिताम् ।

उद्वाहे नियति नयत्यतिबलाद्वेलासमायुक्फलैः ।।१५।।

अज्ञाते प्रथममितिः- आइति उपायपूर्वके स्मरणे विनिपात ज्ञातमेतत्, विदितं यथा सर्वस्यैव जन्तोः प्रथमं जातक फलं प्रधानं, योषितां स्त्रीणां पुनरपरं य द्वैवाहिकं फलं यद् व्यञ्जकं फलानां प्रकाशकं कथमित्याह, उद्वाहे,

विवाहे यानि पतिलग्न ग्रहनियमाद् ग्रहाणां सुस्थितत्त्वं दुःस्थितत्त्वं वासा प्राक्प्रथममेव विवाहकात्परितोऽतिबलात्सुसाधनत्वेनाऽति प्रधानत्वात्प्राक्फलैर्वा याश्च प्राक्शीघ्रमेव जातक फलमभिभूय फलैर्वक्ष्यमाणं वैवाहिकैः सौभाग्य दौःशील्यादिभिः समां तुल्यां यथोक्तां वेलां नयति प्रापयतीत्यर्थः। एवं जातककोक्तं फलं वैवाहिकैः फलैं र्बाध्यत इति । पूर्वोक्त परोक्तयोः परोक्त विधिर्बलवानिति परिभाषा । आचार्येण जातके ग्रहाणां दशाफलमादावभिहितम् । "सम्यग्बलिनः स्वतुङ्गभागे सम्पूर्णा इति ।" पुनरप्यभिहितम । "पाकस्वामिविलग्नगे सुहृदिवा ।" इत्यनेन जातकफलं वैवाहिकेन्तभिभूयते ।

तथा हि शौनकमुनिः—

येन हि यत्प्राप्तव्यं तस्य विधानं सुरेशइन्द्रोऽपि ।
साक्षान्नियत गतिज्ञः सोऽपि नशक्तोऽन्यथा कर्तुम् ॥
तद्विज्ञाने यद्यपिलग्ने लेखां समेति गृहम् ।
जन्मन्यथवा प्रश्ने सर्वं सदृशं विवाहेऽपि ॥

ततः प्रकृतिरेव संख्या वित्तायुः कर्मणां परिज्ञेया तात्कालिक ग्रहेभ्योलग्नाद्वा जन्मविधिर्नैवेति ॥१५॥

भावबोधिनीः- प्राणीमात्रका निमित्त जातकफल पहिल्यै बताइसकिएको छ । विशेष गरेर स्त्री जातिका निमित्त अर्को विवाह संबन्धी फल प्रकाशमा ल्याउन पर्ने कारण किन ? त्यैं विषय आचार्य भन्दछन्, पतिको लग्न र ग्रहस्थितिबाट स्त्रीको शुभ अशुभ फलको ज्ञान हुन्छता पनि, उपर्युक्त विषयलाई छोडेर विवाहलग्नबाट पनि कन्याको सौभाग्य, दुर्भाग्य, सुशील र दुःशील आदि गुणको विचार गरिन्छ। अतः पूर्वको विधान भन्दा पछिको विधान बलियो हुन्छ भन्ने नियम अनुसार जातक शास्त्रमा बताइएका नियम भन्दा वैवाहिक नियम नै बलियो भयो ॥१५॥

अधुना विवाहमत प्रदर्शनमाहः

वात्स्यो वर्षमनोजमिच्छति तथा एम्योजनश्चोत्तरं
स्त्रीणांशानमृतुं विहाय मुनयो माण्डव्य शिष्याजगुः।
चैत्रंप्रोऽय पराशरो कथयते दुर्भाग्यदं योषितां
आषाढादि चतुष्टयेन शुभदं कैश्चित्प्रदिष्टंद्विजैः ॥१६॥

वात्स्यो वात्स्याख्यो मुनिः अनोजं अविषमं कल्पादौ द्वितीय चतुर्थ षष्ठाष्टमादि यद्युग्मं समसंख्यावर्षं मब्दं तदैव विवाहमिच्छति न विषमम् ।

तथा चवात्स्योमुनिः—

दैवज्ञं निर्दिशेद्युग्म मुद्वाहेऽब्दं प्रयत्नतः ।
युगाब्दे संपदो विद्या धर्म कामायुषः सदा ॥

भर्तृ द्विष्टा भवेदोजे वर्षे कन्यात्व संशयम् ।

एभ्यो जनश्चोत्तरमिति–एभ्यारव्यो मुनि रुत्तरायणं विवाहे शोभनमिच्छति न दक्षिणायनम् ।

तथा च एभ्योमुनिः–

उत्तरां भजमानेन काष्ठां वै सप्तसप्तिना ।
चतुर्णामपि वर्णानां विवाहः श्रेष्ठ उच्यते ।।

स्त्रीणामानमिति स्त्रीणांमानं स्त्रीसंज्ञक मृतुं विहाय त्यक्त्वा वर्षा शारदावित्यर्थः । माण्डव्यनाम मुनेः शिष्याश्छात्रा मुनयोऽस्मिन्तः शोभनो विवाह इति । जगुरुक्तवन्तः ।

तथा च माण्डव्यशिष्या आह

स्त्रीसंज्ञकमृतुं त्यक्त्वा विवाहोऽत्र सुशोभनः ।
स्त्रीसंज्ञं दुर्भगादिष्टा भर्तुः कन्या भवेत्सदा ।।

चैत्रं प्रोज्य पराशरोऽपीतिः– पराशर मुनिः चैत्रमासं प्रोज्य वर्जयित्वाऽन्यत्र सर्वकालं शोभनो विवाह इति कथयति । अथ शब्दपादपूरणे । यत स्तच्चैत्रे योषितां स्त्रीणां दौर्भाग्यदं दुर्भगत्वं ददाति रङकुर वार्ण्येभ्यः विगत भर्तृत्वं वा ।

तथा च पराशरः–

विहाय चैत्रमन्यस्मिन् मासे पाणिग्रहः शुभः ।
चैत्रे तु दुर्भगा कन्या भर्तुहीनाऽथवा भवेत् ।।

आषाढादि चतुष्टयेन शुभदमितिः– कैश्चित् द्विजैर्मूनिभिर्गर्गादिभि राषाढादि मास चतुष्टयं आषाढ श्रावण, पाद्रपदाश्वपुजाख्यमशुभद मरिष्टप्रदं प्रदिष्टमुक्तम् ।

तथा च वात्स्योमुनिः–

माघ फाल्गुन वैशाख ऐन्द्र सौम्यानला स्तथा ।
षडेते पूजिता मासा श्चातुर्वर्ण्यस्य नित्यशः ।।
माघमासे भवत्यूढा कन्या सौभाग्य संयुता ।
फाल्गुनोढा भवेत्साध्वी बैशाखेमासि पुत्रिणी ।।
धर्मयुक्ता भवेज्ज्येष्ठे धनिनी कार्तिके भवेत् ।
देवपूजारता नित्यं मासेस्यात्सोम दैवते ।।
उक्ते ज्येष्ठे तथान्येषु मासेषु मुनयो द्युति ।
विवाहं कन्यका यास्यात्सुत शीलार्थ वर्जिता ।।१६।।

भावबोधिनी– कन्याको विवाह समयका संबन्धमा वात्स्यमुनिको भनाई छ द्वितीय चतुर्थ षष्ठ तथा अष्टम आदि जोर वर्षमा विवाह गर्नु पर्दछ भन्दछन् । उत्तरायणमा ब्राह्मण क्षत्रिय वैश्य शूद्र आदि चारै वर्णको विवाह गर्न हुन्छ, दक्षिणयनमा हुदैन भन्ने भनाई छ । स्त्री संज्ञा भएका ऋतु अर्थात् वर्षा र शरद ऋतुलाई छाडेर अरु ऋतुमा विवाह गर्न हुन्छ भन्ने माण्डव्यका छात्रहरुको भनाई छ । चैत्रमा विवाह गरिएकी कन्या दुःखी हुन्छिन् अतः चैत्र महिनालाई छोडेर अरु एघारै महिनामा विवाह गर्न हुन्छ भन्ने पराशरमुनिको भनाई छ । कुनै कुनै गर्गादि ब्राह्मणहरुको भनाई चाहिं आषाढ, श्रावण, भाद्र, आश्विन उपर्युक्त चार महीनालाई छाडर अरु महिनामा विवाह गर्न हुन्छ भन्दछन् ॥१६॥

पुनरप्याहः–

श्रेष्ठं पक्षमुषन्ति शुक्लमसितस्याद्यं त्रिभागं तथा ।
रिक्तां प्रोज्झ्य तिथिं तथात्वयनयोः सन्धिं च शेषाः शुभाः ॥१७॥

श्रेष्ठं पक्षमुषन्तीति–मुनयो विवाहे शुक्लपक्षं श्रेष्ठमुषन्ति कथयन्ति । तथा असितस्य कृष्णपक्षस्याद्यं प्रथमं त्रिभागं दिन पञ्चकं तथा चैतेनैव प्रकारेण श्रेष्ठमेव वाञ्छन्ति ।

तथा च वात्स्योमुनिः–

उग्रसेनोग्रहरिक्तासु तिथिषु स्याद्भर्गदिता ।
दुर्भगा चेति शेषासु सुत सौभाग्य संयुता ॥

तथा त्वनयोः संविदन्ति प्रोज्झ्येत्यपेक्षते । ऋतुसंधिं ऋतुसमष्टि वृषकर्कटकन्यावृश्चिकमकरमीनेषु संक्रमणं रविर्यस्मिन् दिने तं प्रोज्झ्य । अयन सन्धिश्चमकर कर्कट संक्रमण रविर्यस्मिन् दिने तदपि प्रोज्झ्यान्याः सन्धयः शुभा परिशेषराशिषु संक्रमण दिनानि शुभानि । अत्र ऋतु ग्रहणेनैव सिद्धे अयन ग्रहण मतिशयेन वर्जनार्थं प्रज्ञानार्थञ्च । आचारो नामकीर्तनं स्वमनीषिका परिहारार्थं युगादि सन्धावपि न कर्तव्यम् ।

अथ चैषां शौनकमुनिर्विशेषमाहः–

प्रीतिजननी द्वितीया प्रतिपद्यभागिनो दृष्टा ।
अर्थापहा चतुर्थि सौभाग्यफलदा तृतीया च ॥
बहुविघ्नकरी षष्ठी सुखचिन्ताकरी तु पञ्चमी प्रोक्ता ।
अफलाष्टमी बिन्द्याच्छीलसुखा सप्तमी भवति ॥
आनन्दफला दशमी नवमी भयशोकदा ज्ञेया ।
द्वादश्याख्या सफला सुखदा चैकादशी भवति ॥
पूर्णफला पञ्चदशी त्रयोदशी मानपुत्रदा ज्ञेया ।
बहुद्वेषदा तु कथिता चतुर्दशी पक्षयोरुभयोः ॥

अत्रापि कृष्णपक्षे दशमी मप्यविवाहिकां वदन्त्यन्ये ।
तिथयोऽभयोः प्रशस्ताः सौभाग्य सुखावहापञ्च ॥

तथा चः–
अयन द्वेऽपि चलिता भर्तारं नाभिनन्दते कन्या ।
विषुवद्वये च विधवा षडशीति मुखे च सा म्रियते ॥
विष्णुपदेष्वेव गीता कन्या विकलेन्द्रिया व्यतीपाते ।
विष्टयां भ्रष्टचरित्रा शुभगा षट्स्वेव करणेषु ॥
ध्रुवकरणैः शकुनाद्यैः पाणिग्रहणा द्ध्रुवं भवति मृत्युः ।
मासान्मास त्रितया द्विशतिरात्रा त्तथा द्वाश्चेति ॥१७॥

भावबोधिनीः– ऋषि–मुनिहरुले विवाहका निमित्त शुक्लपक्षलाई र कृष्णपक्षको पहिलेका पाँच दिन अर्थात् प्रतिपदा द्वितीया तृतीया चतुर्थी पञ्चमी तिथिलाई शुभ मानेका छन् । रिक्तातिथि ऋतुसन्धि अर्थात् वृष संक्रान्ति, कर्कट संक्रान्ति, कन्या संक्रान्ति, वृश्चिक–मकर संक्रान्ति, मीन संक्रान्ति तथा अयनसन्धि अर्थात् मकर संक्रान्ति कर्कट संक्रान्ति उपर्युक्त सन्धि मानिएका संक्रान्ति र रिक्तातिथिलाई छोडेर अन्य तिथि र संक्रान्तिमा विवाह गर्न हुन्छ ॥१७॥

अधुना ग्रहदिवस फलान्याहः–

आग्नेय ग्रहवासरेषु कलहः प्रीतिस्तु सत्सूत्तमान् ।
कैश्चित्स्थर्यमुषन्ति सौरदिवसे चान्द्रे ससापत्निकम् ॥१८॥

आग्नेयेतिः– आग्नेयग्रहाः रविभौमशनयः तेषां वासरा दिवसाः तद्वारेषु पाणिग्रहणे कृते भार्यापत्योः परस्परं कलहो भवति । सत्सु शुभग्रह दिवसेषु बुध जीव शुक्र वासरेषूत्तमा प्रधानप्रीतिर्भवति ।

तथा च वात्स्योमुनिः–
गुरुशुक्रेन्दुपुत्राणां दिनेषु परिणीयते ।
याकन्या सा भवेन्नित्यं भर्तृ चित्तानु वर्त्तिनी ॥
अर्कार्क पुत्र भौमानां दिनेषु कलहप्रिया ।
सापत्न्यं च समाप्नोति तुषारकर वासरे ॥

तथा च शौनकमुनिः–
सूर्यदिने हृतविभवारावत्सराद्भवन्त्येके ।
मासात्परञ्च शशिनः संयुक्ता सौख्य संपर्का ॥

बन्धन विभवविहीना भ्रष्टचरित्राऽऽवत्सरात्कौजे ।
सौभाग्ययुक्ता बौधे दिवसैश्च षोडशभिः ।।
धनसौख्य पुत्रपौत्रैर्वर्द्धयते वत्सरद्वयाज्जीवे ।
शुक्रदिने पलि ायिता सुखधनयुक्ता तु बत्सरद्वितयात् ।।
पञ्चभिरब्दैर्विगतैर्धनरहिता दुर्भगा सौरे ।
मासैः पञ्चभि रथवा तेषां कालेन पाक निर्देशः ।।

इति पूर्वोक्त मतान्तरेणाप वादमाह । "कैश्चित्स्थैर्यमुषन्ति सौरदिवस इति ।" केचित् मुनयोर्वसिष्ठादयः सौरदिवसे शनैश्चरदिवसे स्थैर्यं स्थिरता मुषन्ति इच्छन्ति । प्रीतिश्च सत्सूत्तमेत्यस्यापबादार्थंमाह । चान्द्रे ससापत्निकं पत्नी सहितं स्थैर्यं नित्यापेक्षते ।

तथा च वसिष्ठमुनिः-
अर्कात्मजेऽपि वैकन्या स्थिता पतिगृहे सदा ।
सोमस्य दिवसेप्येवं किन्तु सापत्नमाप्नुयात् ।।१८।।

भावबोधिनीः– अग्निग्रह अर्थात् सूर्य मङ्गल शनि ग्रहका बारमा विवाह भयो भने बम्पतिमा झगडा भैरहन्छ । शुभग्रहका बारमा अर्थात् बुध बृहस्पति शुक्रवारका दिन विवाह भयो भने स्त्रीपुरुषमा गाढाप्रेम भैरहन्छ । वसिष्ठ आदि आचार्यहरुको मनाई छ शनिवारका दिन विवाह भएको छ भने स्त्रीपुरुषको परस्परमा विछोड हुँदैन । सोमवारका दिन विवाह गरिएकी कन्याले सौता पाउँदछिन् । तर पतिको साथ छुट्दैन ।।१८।।

अधुना वैवाहिकानिनक्षत्राण्याह
मृगशिरसि मघायां हस्तमित्रोत्तरासु स्वसननिर्ऋतिपूषाधातृदेवेषु चोढा ।
बहुसुतशुखदासी वित्तसौभाग्ययुक्ता जनयति परितोषं कन्यका बान्धवानाम् ।।१९।।

मृगशिरसीतिः– मृगशिरसीति तथा मघायां हस्तमैत्रोत्तरायां उत्तरासु तिसृषु उत्तराफाल्गुन्युत्तराषाढोत्तरा भाद्रपदासु, स्वसनो वायु स्तद्दैवतंस्वातो निरृतिर्मूलं पूषा रेवती, धातृदेवो रोहिणी, एतेष्वपि नक्षेत्रेषूढा परिणीता सति बहुसुत सुखदासीवित्त सौभाग्ययुक्ता भवति बहुभिः प्रभूतैः सुतैः सुखैर्विदुःखभावैर्दासीति परिचारिकाभिर्वित्तैः जनयत्युत्पादयति धनैः सौभाग्येन च भर्तृबल्लभैनयुक्ता कन्यका भवति । तथा बान्धवानां बन्धुजनानां परितोषं जनयत्युत्पादयति ।

तथा चात्र वात्स्योमुनिः–
उत्तरात्रितयं सौम्यं प्राजापत्यं तथाऽनिलम् ।
हस्तमूलमघामैत्र पूषादैबतमेवच ।।

विवाहे निर्दिशेद्धर्मं यशोऽर्थान् कालवित्सदा ।
अस्मिन् नक्षत्र संघाते या कन्यापरिणीयते ।।
जन्मानुकूले सावित्तसुख सौभाग्यदायिनी ।।१९।।

भावबोधिनीः– मृगशिरा, मघा, हस्ता, अनुराधा उत्तराफाल्गुनी, उत्तराषाढा, उत्तराभाद्रपदा, स्वाती, मूल रेवती रोहिणो उपर्युक्त नक्षत्रहरुमा विवाह गरिएकी कन्या छोरा–छोरी, नोकर–चाकर तथा धन संपत्तिले परिपूर्ण भएर उत्तमशीलस्वभावले आफ्ना बन्धुजनलाई प्रसन्न पार्दछिन् ।।१९।।

तथोक्तशेषेषु नक्षत्रेषु विवाह दोषमाह
आर्द्राद्ये भचतुष्टये विधवता साग्नेययाम्ये स्मृता ।
शेषेष्वक्षय दोष शोक मरणं व्याध्याद्यनिष्टं बहुः ।।२०।।

आर्द्राद्यइतिः- आर्द्राद्ये आर्द्राप्रथमे भचतुष्टये नक्षत्र चतुष्कें आर्द्रा पुनर्वसु तिष्य अश्लेषाख्ये किं भूते साग्नेय-याम्ये आग्नेयं कृतिका याम्यं भरणी ताभ्यां नक्षत्रद्वयेन सहिते विधवता वैधव्यं भवति विधवता स्मृता उक्ता । शेषेषु दशसु चित्राश्विनीविशाखाज्येष्ठा श्रवणधनिष्ठाशतभिषापूर्वासु अक्षय दोषाः स्थिरा शोकः पुत्रशोकादि, मरणं भर्तृव्याधिः शरीर पीडा आदि ग्रहणात्मानसी पीडा अन्यदनिष्ट मनभिमतं बहु प्रभूतं भवति । दोषग्रहणेनैव शोकादिनामुपादान प्राध्यान्यम् ।

तथा च वात्स्योमुनिः–
उक्त वर्जेषु मोहाद्या कन्यका परिणीयते ।
सा भर्तृमरण व्याधि शोक दारिद्र भागिनी ।।
अत्र च शौनकमुनिः–
हस्तः स्वातिर्मूल मघाऽनुराधोत्तराणी च त्रिणो ।
पौष्ण्यं प्राजापत्यं मृगशिर इति शोभनोड्डुगणः ।।
यावज्जीवं कन्या भर्तारं युज्यते सुखं दुःखम् ।
पश्चादामयरोगैरश्विन्यां याति पत्वञ्चम् ।।
याम्ये षड्भिर्मासैर्वैधव्यं याति निधनत्वं वा ।
व्यक्तमपापं सहस्रैः समतीहाब्द त्रयं कन्या ।।
धनकनक भूषणायुता पाणिग्रहणमेति कृत्तिकायाञ्च ।
उपयुज्यते च पश्चादब्दे याति पञ्चत्वम् ।।
प्राजापत्ये सुभगा पतिव्रता मानिनीप्रियाभर्तुः ।
पुत्र धनानि च लभते समतीते पञ्चमे वर्षे ।।

शुचिरनुकूला पत्युः प्रियंवदा सोमदैवते कन्या ।
समतीताब्दत्रितयं कुलद्वयं शोच्यतां याति ॥
आर्द्रासु सौम्यकर्मा वर्षेणैकेन याति पञ्चत्वम् ।
त्रिभिरब्दैर्नाशत्वं समुपैत्यदितौ पतिं नित्यम् ॥
अब्दचतुष्कात्कन्या गुरोऽस्तु विद्द्वेषिणी भवति पुष्ये ।
कृपणा पति संत्यक्ता वैधव्यं वा समायाति ॥
अश्लेषाष्वपि कन्या पाणिग्रहणं समेत्य भर्तारम् ।
सप्तभिरब्दैः परतः कुलटात्वं वा समायाति ॥
परिणयनकाले कन्या पञ्चवर्षगते धन्या ।
भवति स्त्री धर्मयुता पित्र्ये पाणिग्रहणं प्राप्य ॥
····· सुतसौभाग्य दासत्वं याति निर्भया कन्या ।
अब्दद्वये व्यतीते पतिमरणंप्राप्नुयाच्चैव ॥
व्यपगतशोका सुभगा भोगवती सुप्रजा प्रियाभर्तुः ।
अर्यम्णे शशियुक्ते कन्या वर्ष (व्य) ऽतीते ॥
हस्ते पाणिग्रहणं समेत्य कन्या पतिव्रता नित्यम् ।
भर्तुः सुखानि यच्छति समतीते पञ्चमे वर्षे ॥
आत्मप्राणवियोगं पतिमरणं वा समाप्नुयात्कन्या ।
अथवा शीलभ्रंशं त्वष्ट्रे प्राप्नोति बन्धुकुलान् ॥
स्वातौ धर्मसमेता पति दयिता बन्धुबल्लभासाध्वि ।
वर्ष चतुष्केऽतिते परमं प्राप्नोति सौभाग्यम् ॥
ऐन्द्रगणेऽपि हि कन्या पतिधिष्ठामुपैति पतिमन्यम् ।
पश्चात्पञ्चभिरब्दैः पञ्चत्वं याति रोगेण ॥
व्यपगतरोगा साध्वी निपुणा गुरुदेवतापरक्ता ।
अब्दचतुष्केऽतीते मैत्रे कन्या धनमुपैति ॥
पत्युरपत्या नित्यं दुःखान्यनुभूय शाक्रभे कन्या ।
दशमेऽब्दे वैधव्यं प्रयाति दुर्गमेन मृत्युः ॥
मूले सधना साध्वी पत्युरतीवप्रिया प्रचण्डाच ।
वर्षे चैकादशमे सा श्वसुरस्योन्नतिं कुरुते ॥

अशुचिरता चाग्यरता यत्नात्पुनरन्य भर्तारम् ।
अब्दद्वयेन कन्या ज्ञेया पूर्वाषाढेषु ॥
विदधाति वैश्वदेवे भर्तुर्वित्तं च गुरुजनानुरता ।
धर्म क्रियार्थ निपुणा यशस्विनी चाष्टमे वर्षे ॥
पाणिग्रहमुपयातैः श्रवणे नैकत्र सारमते ।
समतीताब्द त्रितयं मृत्युवशं याति शस्त्रेण ॥
उपचरतेऽब्द चतुष्के ज्ञातव्या नैधना कन्या ।
विभ्रष्टा स्मृतिशौचा मृत्युमुखे याति वसुदेवे ॥
ईर्षारोषेणहता यमसदनं याति वारुणे पाशात् ।
सलिलद्वारे स्खलिता याति विनासत्वजैक पादेन ॥
कन्या मणिकनकविभूषणादि प्रभूत मासाद्यः ।
वर्षेऽष्टमे व्यतीते भर्तृ लक्षस्योन्नतिं कुरुते ॥
प्राप्नोति शीलशौचैः पौष्णे यानासनोपकरणानि ।
सौभाग्यं चाप्रतिमं किञ्चिन्न्यूनं तृतीयेऽब्द इति ॥२०॥

भावबोधिनीः– आर्द्रादेखि चारनक्षत्र अर्थात् आर्द्रा पुनर्वसु पुष्य अश्लेषा र कृत्तिका भरणी उपर्युक्त छ नक्षत्रमा कुनै कारणवस विवाह भयो भने कन्या विधवा हुन्छिन् । अरु शेष नक्षत्रमा अर्थात् चित्रा अश्विनी विशाखा ज्येष्ठा श्रवण, धनिष्ठा शतभिषा पूर्वा फाल्गुनी पूर्वाषाढा पूर्वाभाद्र पदा उपर्युक्त दशनक्षत्रमा विवाह गरिएकी कन्याले जीवनमा कहिल्यै नमेटिने दोष अथवा पुत्रशोक धनशोक पति वा पत्नीको मृत्यु नाना प्रकारका आधि-व्याधीको मार शहीनै रहनु पर्दछ ॥२०॥

अथ तरानुकूल–चन्द्रानुकूलञ्चाहः–

प्रीतिर्जन्मसु तारकासु परतः सञ्ज्ञानुरूपं फलम् ।
चन्द्रे चोपचयाऽऽद्य सप्तम गते सौभाग्य सौख्याप्तयः ॥२१॥

प्रीतिर्जन्मष्विति:– जन्मनि जन्माख्यासु तारकासु परस्परं जायापत्योः प्रीति र्भवति । येन नक्षत्रेण विवाह स्तस्यायं विचारः। परतोऽन्याम् शेषासु तारकासु संज्ञानुरूपं नामसदृशं शुभाशुभं फलं ज्ञेयम् । तद्यथा संपत्करासु संपदो भवति, विपत्करासु विपदः क्षेमकरासु क्षेमम् । पापासु पापम् शुभासु शुभम्, कष्टासु कष्टम् मैत्रासु मैत्रम्, अतिमित्रास्वति मैत्री । जन्मर्क्षं तद्दशमं तदेकोनविंशं चेति जन्मतारा । एवमन्या द्वितीया संपत्संज्ञा, तृतीया विपत्, चतुर्थी क्षेमा पञ्चमी पापा, षष्ठी शुभा, सप्तमी कष्टा, अष्टमी मैत्री, नवमी अतिमैत्री ।

तथा च वात्स्योमुनिः–

जन्मर्क्षे परिणीता स्यात्कदाचि द्भर्तृ बल्लभा ।
उक्तैवं जन्मर्क्षेद्वे तारे जन्मसंज्ञके फलदे ।।
जन्मर्क्षोढाकन्या न भवति भर्तुः शुभा नित्यम् ।
आधान कर्मणोरुढा सततं पतिबल्लभा ।।
संज्ञानुरूपं शेषेषु फलमाप्नोति कन्यका ।
संपद्विपत्ति क्षेमं च पापं शुभमथापिच ।।
निधनं मित्र भावञ्च परां मैत्रीं तथैवच ।

तथा च शौनकमुनिः–

जन्मर्क्षगे प्रमुदिता भर्तारं नाभिनन्दते नारी ।
धानधान्य भूषणयुता भवति च संपत्करगते शशिनी ।।
उद्वेग कलह विभ्रमरोदनशीला विपत्करा ज्ञेया ।
क्षेमे प्रसन्न हृदया विगतभया रोग रहिता च ।।
च्युतशौचाऽपत्यरता वैरान्विता रोगभय तप्ता ।
प्रज्ञा प्रसिद्धकर्मा सुमनोज्ञा साधकगणे भवति ।।
निधनाख्ये बहुदुःखा निधनं समुपैति तापितायतना ।
प्रियदर्शना सुरूपा मैत्रे पत्युप्रिया चैव ।।
अतिमैत्रे सुभगास्यात्पतिदयिता विगत शोक रिपुपक्षा ।
सितपक्षे शुभफलदा विरचित ताराष्वपि शशाङ्क इति ।।

चन्द्रेचोपचयेतिः– चन्द्रे कन्याकुमारयो श्चोपचयगते विशेषानभिधाना त्तयोरपि, उपचय भवनानि त्रिषडेकादशमानि, एते समुपचयगते व्यवस्थिते तथा आद्यगते प्रथमे जन्मराशिस्थे इत्यर्थः । सप्तम गतेऽपिच विवाहे सौभाग्य सौख्य प्राप्तये भवन्ति । शेषेष्वशुभं फलमित्यर्थादि्गम्यते ।

तथा च वात्स्योमुनिः–

सप्तमोपचयस्थश्च जन्मराशि गतस्तथा ।
मित्रोच्च क्षेत्रगश्चन्द्रो बलीयांश्च प्रशस्यते ।।
शेषराशिगते कन्या मरणं शीघ्रमाप्नुयात् ।
अथवा पतिना त्यक्ता वृजे द्देशान्तरान् बहून् ।।२१।।

भावबोधिनीः– जन्मतारामा विवाह भएका वरबधू परस्परको प्रेममा चुर्लुम्ब डुब्दछन् । जुन नक्षत्रमा

विवाह हुन्छ त्यसै नक्षत्रको यस बारे विचार गरिन्छ । अन्य अवशिष्ट ताराहरुको नामानुसार फल प्राप्त हुन्छ । जस्तै– संपत्तारामा विवाह भएको छ भने उपर्युक्त वरबधू प्रशस्त संपत्तिशाली हुन्छन् । विपत्करा तारामा विवाह भएको छ भने वरबधू सदा दुःखी हुन्छन् । क्षेमकरामा विवाह भएको छ भने वरबधू दुवैको कल्याण हुन्छ । पाप तारामा विवाह भएको छ भने दुवै पापी हुन्छन् । शुभतारामा विवाह भएको छ भने सदा आनन्दै आनन्दले जीवन ब्यतीत गर्दछन् । कष्टतारामा विवाह भएको छ भने वरबधू दुवैले कष्टमय जीवनयापन गर्दछन् । मित्रतारामा विवाह भएको छ भने आफ्ना संपर्कमा आएका सबै मित्र हुन्छन् । अति मित्रतारामा विवाह भएको छ भने उपर्युक्त मित्रहरुमा गाढ मैत्री हुन्छ । जन्मनक्षत्र त्यसदेखि दशौं नक्षत्र र उनाईसौं नक्षत्रलाई जन्मतारा भन्दछन् । त्यस्तै दोस्रो संपत्तारा, तृतीय विपत्तारा, चतुर्थ क्षेमतारा, पञ्चम पापतारा, छैटौं शुभतारा, सातौं कष्टतारा, आठौं मैत्रीतारा, नवौं अतिमैत्रीतारा । यदि चन्द्रमा वरबधू दुवैको उपचय स्थानमा बसेको छ वा जन्मराशिमा बसेको छ अथवा सप्तम-स्थानमा छ भनेत उपर्युक्त वरबधू सदा सुखी हुन्छन् ॥२१॥

अधुना मुनिमतानाहः–

नक्षत्र तुल्यं फलमाह गर्गः क्षेणेषु नक्षत्रप सञ्ज्ञितेषु ।
हारीत बभ्रू द्विजदेवलश्च विष्टि विनाऽन्यत्करणं प्रशस्तम् ॥२२॥

नक्षत्र तुल्यमितिः– गर्गमुनिः क्षणेषु मुहूर्तेषु नक्षत्रप संज्ञितेषु नक्षत्रपति समान सञ्ज्ञा ये मुहुर्तास्तेषु नक्षत्र-तुल्यं नक्षत्र सदृशफलं शुभमशुभं वा कथयति । यथा शिवाख्ये मुहुर्ते आर्द्रातुल्यफलं भुजगाख्ये शेषसममित्येवं सर्वत्र ज्ञेयम् ।

तथाच भगवान् गर्गः–

समान दैवतै स्तुल्यं नक्षत्रैः फलमादिशेत् ।
मुहूर्तेष्वभिजिद्वर्जमुद्वाहे कालचिन्तकः ॥
अष्टमो दिवसस्यार्द्धे योऽभिजितसंज्ञकः क्षणः ।
स ब्रह्मणो वरं नित्यं सर्वकाम फलप्रदः ॥
पापग्रहोदयाद्यैश्च पापैर्नैव हि बाध्यते ॥

हारीतबभ्रुद्विजदेवलैश्चेतिः– द्विजो ब्राह्मणो मुनि रित्यर्थः । हारीतो द्विजः बभ्रु द्विजः देवलश्च द्विजः एतै-र्मुनिभिर्विष्टिकरणं विना तद्वर्जयित्वा अन्यत्करणं बवादिकं प्रशस्तं मतमिति ।

तथाच हारीतः–

विष्टिवर्जेष्वन्यथान्येषु करणेषु धनार्थिता ।
विष्ट्या यमालयं यान्ति सपुत्र पशुबान्धवाः ॥२२॥

भावबोधिनीः– मुहूर्तका स्वामि र नक्षत्रका स्वामि एउटै देवता पर्न गएमा मुहूर्तको फल र नक्षत्रको फल समानै हुन्छ, उपर्युक्त फल शुभ भए शुभ र अशुभ भए अशुभ हुन्छ । जस्तै शिवमुहूर्तको स्वामि भगवान् शङ्कर र

आर्द्रा नक्षत्रको स्वामि पनि शङ्करै हुनाले उपर्युक्त मुहूर्त र नक्षत्रको फल समानै हुन्छ भन्ने मत गर्गमुनिको छ। भद्राकरणलाई छोडेर अन्य बवादि करणहरु विवाहमा ग्राह्य छन् भन्ने हारीत वभ्रु देवल आदि ब्राह्मणहरुको भनाइ छ ॥२२॥

पुनरप्याहः--

तिथि दिन करणर्क्षलग्नवीर्यं परिचयमाह पराशरः क्रमेण ।
तिथि रितिबलवान् वदन्ति गर्गाः करणबलाद्दिवसोऽपि भागुरिश्च ।
दिनकरण बलाद्भृगु र्भवीर्यं बलमुदयस्य जगाद जीवशर्मा ॥२३॥

तिथिदिन करणर्क्षलग्नवीर्यमितिः– पराशराख्यो मुनिः तिथिदिनकरणर्क्षलग्नानां परिचय क्रमेणात्तरोत्तरं बलाधिक्यमाह कथयति । तिथिर्नन्दादिकं दिनं ग्रहवारः करणं बवादि ऋक्षं नक्षत्रमश्विन्यादि, लग्नं मेषादि एषां क्रमेणोत्तरोत्तरं बलम् । तिथेर्वार वारात्करणं करणान्नक्षत्रं, नक्षत्राल्लग्नमिति । उत्तरोत्तरं फलप्रदमिति ।

तिथिरिति बलवान् वदन्ति गर्गाः ,गर्गादि मुनयः तिथिरिति बलवान् वदन्ति कथयन्ति ।

तथा च गर्गः–

लग्नर्क्ष दिनवाराणां तिथिरेव प्रशस्यते ।
पाणिग्रहः शुभतिथौ धर्मकामार्थ सिद्धिदः ॥

करणबलाद्दिवसोऽपि भागुरिश्च । भागुरिनाम मुनिः करणबलाद्दिवसो वारो बलवानाह ।

तथा च भागुरिः–

करणाद्ग्रहवारश्च बलवान् परिकीर्तितः ।
शुभग्रह दिनेकन्या सुखिताऽन्यैश्च दुःखिता ॥

दिनकरणबलादितिः– भृगुर्नाम मुनिः दिनकरणबलाद्भवीर्यं नक्षत्रादीनां कथयति ।

तथा च भृगुः–

करणाद्ग्रहवाराच्च वारान्भः परिकीर्तितः ।
ततो नक्षत्रवीर्यं च शुभफलप्रदं 'भवेत्' ॥

बलमुदयस्य जगाद जीव शर्मा इति, जीवशर्मा नामाचार्य उदयस्य लग्नस्य बलं वीर्यं जगादोक्तवान् ।

तथा च जीवशर्माः–

तिथि रेकगुणः प्रोक्तं नक्षत्रं च चतुर्गुणम् ।
ग्रहश्चाष्ट गुणं प्रोक्तं लग्नं सर्वत्र शस्यत इति ॥

एतद्विशेषं प्रतिविषय बलाबलश्च तेषामिति । मुनयः कथयन्ति प्रभृताः । स्वं स्वं विषयं प्रति एषां बलाबलं यो यस्यात्मीयं विषयं येन यत्कर्मोक्त तस्य तस्मिन् कर्मणि बलाबलं विचार्यमित्यर्थः । एषामित्यनेन तिथ्यादयः परामृष्यन्ते । इत्येवमिति प्रभृतयः । स्व बहवो मुनयः कथयन्ति । यथाऽभिचारादिकं देवतादीनां भद्रातिथ्याश्रितः । आदित्याङ्गारक दिने सुवर्ण कर्म ग्रहाश्रितम् । विष्टयां शत्रुविषये विषयोगोऽभिघातो वा करणाश्रितम् क्षुरवस्त्रादि नक्षत्राश्रितम् । विवाह मौञ्जिबन्ध गृह प्रवेशादि लग्नाश्रितम् । विवाहे तु पुनः सर्व एव शुभाग्राह्याः। यस्मादुत्तरोत्तरं बलमुक्तम् । एवमिदं प्रोक्तं नवो ये ये यद्यपि सर्वत्र शुभं भवति ।।२३।।

भावबोधिनी– तिथिभन्दा वार उत्तम, वार भन्दा करण उत्तम करणभन्दा नक्षत्र उत्तम, नक्षत्र भन्दा लग्न उत्तम हुन्छ, अतः विवाहमा उपर्युक्त सबैभन्दा लग्नकोनै प्राधान्य हुन्छ भन्ने पराशरको भनाइ छ । तर वार करण नक्षत्र लग्न भन्दा उत्तम तिथिनै हो र विवाहमा सर्वोपरि तिथिलाई नै ग्राह्यता दिनु पर्दछ भन्ने गर्गाचार्यको भनाइ छ । करण बल र दिन बल नै मुख्य मान्नु पर्दछ किन भने शुभग्रहका वारमा विवाह गरिएकी कन्या सुखी हुन्छिन्, पापग्रहका वारमा विवाह गरिएकी कन्या दुःखी हुन्छिन् भन्ने भनाइ भागुरिको छ । वारबल र करण बल भन्दा विवाहमा नक्षत्र बलनै मुख्य मान्नु पर्दछ भन्ने भृगुऋषिको भनाइ छ । विवाहमा सबभन्दा मुख्य लग्नलाई नै मान्नु पर्दछ भन्ने जीवशर्माको भनाइ छ ।।२३।।

अथात्र स्वमतमाहः–

करणभतिथयोऽर्द्ध भुक्तभोगाः स्वफलकरा न भवन्ति तत्र साम्ये ।
करण तिथिवासरोदयानां चरण विवृद्धिरनुक्रमात्फलानाम् ।।२४।।

करणं बवादि भं नक्षत्रं तिथिर्नन्दादिकं एते सर्वेकरण भतिथयोऽर्ध भुक्तभोगाः स्वेभ्यो यावन्मित भोगोगणित स्कन्धे दृष्टः । ततोऽर्द्धमितिक्रान्ताः स्वफलकरा न भवन्त्यात्मीयं फलं न सम्पादयन्ति । एतेषां शुभाशुभं वा फलं तत्र नकुर्वन्तीत्यर्थः । तत्र तेषां साम्ये 'उ' दितो युक्त ......तिथिकरण तिथिवासर योगानामनुक्रम फलानां चरण विवृद्धिः पाद विवृद्धि र्भवति । करणाद्भस्य साम्ये सति पादेनाधिक फलम् तिथि......................भवारस्य पदेनाधिक फलम् । दिवा उदयस्य लग्नस्य पादेनाधिकं फलम् । एतदुक्तं भवति करण नक्षत्र शुभयोः शुभयोर्नक्षत्रश्च फलमधिकं शुभं भवति । अशुभयोरशुभम् ।

भावबोधिनी–करण बव आदि नक्षत्र अश्विनी आदि तिथि नन्दादि उपर्युक्त करणादिले गणितद्वारा हेर्दा आफ्नो भोगको आधा भन्दा अधिक भोग गरिसकेका छन् भने आफुले दिनुपर्ने फल दिन सक्तैनन् । अर्थात् उनीहरुले दिनुपर्ने साधारण शुभाशुभ फल दिन सक्तैनन् । करण, तिथिवार नक्षत्र लग्न यिनीहरुको साम्यता भएमा चतुर्थांशका हिसाबले फलमा वृद्धि हुन्छ । करण र नक्षत्र दुबै शुभ भएमा करण भन्दा चतुर्थांश अधिक नक्षत्रले शुभफल दिन्छ । त्यस्तै नक्षत्र भन्दा बार र बारभन्दा अधिक शुभफल लग्नले दिन्छ ।।२४।।

अथ कन्याकुमारयोः परस्परमनुकूलमाहः–

षट्काष्टके मरणबैरवियोगदोषा द्विर्द्वादशे निधनताऽप्रजाता त्रिकोणे ।
प्रीतिः परानिगदिता समसप्तकेषु शेषेष्वनेक विधसौख्य सुतार्थ संपत् ।।२५।।

परस्परं कन्याकुमार्योर्जन्मराशौ षट्काष्टके मृतिर्मरणं वैरं परस्परोद्वेषः वियोगं देशान्तरे गमनमित्येक दोषा भवन्ति । तथा द्विर्द्वादशे निधनता दारिद्रयं भवति, त्रिकोणे नवपञ्चमेऽप्रजता अपत्य रहितता, समसप्तकेतु पराप्रकृष्टा

प्रीति निगदितोक्तः। शेषेषु तृतीयैकादश चतुर्थदशमेषु अनेक विधानां बहुप्रकाराणां सौख्यानां सुतानां पुत्राणाञ्च संपत् समृद्धिर्भवति।

तथा च वात्स्योमुनिः–

षट्काष्टके त्रिकोणे च द्विर्द्वादशकमेवच।
परस्परं जन्मनाथमृक्षं कन्याकुमारयोः॥
षट्काष्टके भवेद्दोषा वैधव्यं मृत्युरेवच।
त्रिकोणे पुत्र हानिः स्याद्धनहानि र्धनव्यये॥
परस्परं जन्मराशे राशेरुभय सप्तमे।
एके चतुर्थदशके तृतीयैकादशेऽपिवा॥
तयोः पुत्रार्थ सौभाग्यं संपद् भवति नित्यशः॥२५॥

भावबोधिनी–कन्या र कुमारको जन्मराशिबाट परस्परमा छैठौं र आठौं परेको छ भने वर–बधू मध्ये एउटाको मृत्यु हुन्छ अथवा प्रतिदिन झगडा भैरहन्छ वा परदेशमा जानाले वियोग जन्य दुःख सहन पर्दछ। यदि परस्परमा द्वितीय र बारौं परेकोछ भने अर्थ संकट भोग्नु पर्दछ। यदि परस्परमा नवम र पञ्चम परेको छ भने सन्तानहीन हुन्छन् परस्परमा सातौं परेकोछ भने अत्यन्त प्रेम हुन्छ तृतीय चतुर्थ दशम एघारौं परेकोछ भने अनेक सुख सौभाग्य भोग्ने र पुत्रपौत्रादिले संपन्न हुन्छन्॥२५॥

अथाऽत्रापवादमाहः–

षट्काष्टकेऽपि भवनाधिपमेव भाव
एकाधिपत्यमवलोक्य च वश्यराशिम्।
कार्यो विवाह समयः शुभकृत्सदुक्तः–
स्ताराभवेद्यदि परस्परतोऽनुकूला॥२६॥

अत्रापिशब्दः संभावनायां वर्तते। षट्काष्टकेऽपि परस्पर भवनाधिपयो र्जन्मराशिभ्यो मित्रो मित्रभावः सुहृत्त्वं नैवालोक्याऽऽचार्यै र्मित्रामित्रत्व जातके उक्तम् "शत्रूमन्द सितौ समश्च शशिजो मित्राणिशेषारवे" रित्यादि ग्रन्थेन। तथैकाधिपत्यमेव स्वामिना यथा मेषवृश्चिकेयो र्वृषतुलयो र्मकरकुम्भयो र्धनुषमीनयो, वश्य यदि मनुष्य राशिवरस्य स्त्रीराशि बश्यो भवति। वश्यराशित्वं च यात्रायामुक्तम्।

द्विपदवशगाः सर्वे सिंहं विहाय चतुष्पदाः।
सलिलनिलया भक्ष्या वश्या सरीसृपजातयः॥
मृगपति वशे तिष्ठन्त्येते विहाय सरीसृपा।
'अ' कथित गृहचे बूह्य वश्यजन्म व्यवहारत इति॥

एवं विचार्यषट्काष्टकेऽपि विवाह समयः कार्यः करणीयो भवति । ये किं पुन द्विर्द्वादशादिष्विति यदि चेत्परस्परमन्योऽन्यं तारानुकूला शुभा भवति तदा कार्यो विवाहः । स च शुभफलकृदुक्तः कथितोऽन्यत्र मित्रादित्वे विद्यमानेऽपि ।

अत्र च वात्स्योमुनिः-

द्विर्द्वादशे त्रिकोणे च मैत्रीक्षेत्रपयो र्यदि ।
भवेदेकाधिपत्यं वा ताराप्रीति स्तथाऽपिवा ।।
कर्मः स योगो नतु षट्काष्टके पुन इति ।।२६।।

भावबोधिनी-वर-बधूको कुण्डली हेर्दा परस्परमा छैटौं- आठौ परेको छ कि छैन सर्व प्रथम त्यो हेर्नु पर्दछ, दुवै पक्षका राशिको स्वामिमा मित्रता छ अथवा छैन भन्ने कुरो हेरिरहनु पर्दैन । केवल एकाधिपत्य अर्थात् वर-बधूका जन्मराशिको स्वामि एउटै हो कि हैन भन्ने मात्र विचार गर्नु पर्दछ । जस्तै- मेष- वृश्चिक, वृष-तुला, धन-मीन, मकर-कुम्भ जस्तो परेको छ भने र वश्य मिल्दछ भने विवाह गर्न हुन्छ । राशिकास्वामि बेग्ला बेग्लै छन् वश्य पनि मिल्दैन भने विवाह गर्न हुँदैन ।।२६।।

अधुना चन्द्रयुक्तानां ग्रहाणां समागम फलमाहः-

दारिद्रयं रविणा कुजेन मरणं सौम्येन नस्युःप्रजाः
दौर्भाग्यं गुरुणा सितेन सहिते चन्द्रेण सापत्निका ।
प्रव्रज्यार्क सुतेन सेन्दुजगुरौ वाञ्छन्ति केचिच्छुभम्
व्याध्यैर्मृत्युरणं ग्रहैर्बहुविधा दीक्षा प्रवासाः शुभैः ।।२७।।

विवाहकाले रविणार्कसहिते संयुक्ते चन्द्रे दारिद्र्यं निर्धनत्वं भवति, एवं कुजेनाङ्गारकेन सहिते मरणं भवति, सौम्येन बुधेन सहिते प्रजा नस्युः पुत्रा नस्यु र्नभवेयुः । गुरणा जीवेन दौर्भाग्यं दुर्भगत्वं, भर्तु रवल्लभ्यं, सितेन शुक्रेण सहिते चन्द्रे ससापत्निकं, अर्कसुतेन शनैश्चरेण प्रव्रज्या व्रतसेवित्वम् ।

अत्र च वात्स्योमुनिः-

आदित्ययुक्ते शितांशौ दारिद्र्यं कष्टमादिशेत् ।
कन्यायामरणं ब्रूयात्कुजयुक्ते निशाकरे ।।
विपुत्रतां सौम्ययुक्ते दौर्भाग्यं गुरुणा भवेत् ।
सापत्नं शुक्रयुक्ते स्यादार्कि युक्ते च दीक्षणम् ।।

सेन्दुजगुरौ वाञ्छन्ति केचिच्छुभम् । केचित् शौनकादयः सेन्दुजगुरौ इन्दुजेन बुधेन गुरुणा जीवेन च संयुक्ते चन्द्रे शुभं वाञ्छन्ति ।

तथा च शौनकमुनिः–

रविणा युक्ते चन्द्रे सुखवित्तविर्वजिता भवति ।
कन्या भौमेन बधं विद्याद्वैधव्यं वा समायाति ।।
चन्द्रसुते बहुनिपुणा साध्वी लोकोपचार कुशला च ।
पुत्रवती पतिदयिता बहुवित्ता भवति जीवेन ।।
शुक्रेण भवति दासी रोगै स्तप्तार्थ दुःखिता वापि ।
धूर्ता सुराप्रमत्ता न शान्ति मुपयाति समन्दे ।।

तथा च वादरायणः–

भास्कर युक्ते चन्द्रे भवति सुतैर्वजिता दुराचारा ।
भौमेन सहसंयुक्ता गात्रच्छेदं समाप्नोति ।।
स्वसुत युते रजनिकरे सत्यवती धर्मशील संयुक्ता ।
सुरगुरुणा पतिदयिता सधना नियमाच्च पुत्रिणी साध्वी ।।
शुक्रे विपन्न शीला नोपमं कन्यका प्रजानूढा ।
सौरेण दुःखतप्ता पश्चाद्दासत्व मुपगच्छेत् ।।

तत्र च वशिष्ठः–

दारिद्र्यं मरणं घोरदासीदौःशिल्यमेवच ।
चन्द्रयोगे ग्रहाःकुर्यू रविभौमार्किभार्गवाः ।।
नैपुण्यं कुलपूज्यत्वं बुधोजीवो यथा क्रमम्मिति ।

एत दाचार्यस्याभिप्रेतं यतः परमतमप्रसिद्धमनुमतर्मिति । तथा चाऽनेन चोक्तं संहितायाम् ।

रोहिण्युत्तर रेवती मृगशिरा मूलानुराधा मघा–
हस्तस्वातिषु षष्ठतौलिमिथुनेषूद्यत्सु पाणिग्रहः ।
सप्ताष्टान्त्य वहिःशुभैरुडुपति श्चैकादश द्वित्रिहाः
क्रुरैस्त्र्यायषडाष्टगेन तु भृगौ षष्ठे कुजे चाष्टमे ।।
दम्पत्यो र्द्विनवाष्ट राशि रहिते बारानुकूले रवौ
चन्द्रे चार्ककुजार्कि शुक्र वियुतेमध्येऽथवा पापयोः ।
त्यक्त्वा च व्यतिपात वैधृति दिनं विष्टि च रिक्ता तिथि
क्रूराहायन पौष चैत्र विरहे लग्नात्मके मानुषे ।।

" " चन्द्रसहितौ बुधजीवौ शोभनावुक्ताविति । द्वयो र्मृत्युरिति । असंग्रहे पापग्रहे द्व्याद्यैर्द्व्यादौ येषां ते द्व्याद्याः । द्वाभ्यां त्रिभिर्वायुक्तेन चन्द्रमसि मृत्युर्मरणं भवति । शुभै र्द्व्याद्यैर्युक्ते बहुविधानानाप्रकारा दीक्षा प्रवासा व्रतभङ्गा भवन्ति ।

तथा च वात्स्योमुनिः--

तमोयुक्ते भवेद्दास्यं द्व्याद्यैः क्रूरग्रहैः सह ।
स्थिते चन्द्रे भवेत्मृत्यु र्दीक्षास्यु र्विविधाशुभैः ।।

वसिष्ठश्च-

द्वाभ्यां त्रिभिश्चतुर्भिर्वा दारुणैः सहितः शशी ।
दारिद्र्यं मरणं चापि कन्यायाः कुरुते ध्रुवम ।।
प्रव्रज्यां भजतेनारी गैरिकांबर भूषिताम् ।
विदेशं वा प्रपद्यन्ते सौम्यैर्चापियुतः शशी ।।

गर्गेणाऽपि -

राहौ मद्यामिष प्रिया इति वाक्यम् ।

बादरायणेन च--

राहुसमेते चन्द्रे प्राप्य पाणि ग्रहेण तु कन्या ।
परपुरुषाशक्तहृदया नीचैरपियाति संसर्गम् ।।

शौनकमुनि विशेषतरभिच्छतिः-

लग्नस्थे शशियुक्ते जामित्रगश्चवर्जयेद्राहुः ।
वैधव्यं मरणमेति दौर्भाग्यदायको मुनिभिरुद्दिष्टः ।।
एतत्सर्वथा विचार्यमिति ।।२७।।

भावबोधिनी- यदि विवाहका समयमा चन्द्र-सूर्यको योग छ भने वधू दरिद्र हुन्छिन् । उपर्युक्त समयमा मङ्गल र चन्द्रमाको योग छ भने वधूको मृत्यु हुन्छ । उक्त समयमा बुध-चन्द्रको योग छ भने वधू सन्तान हीन हुन्छिन् । उपर्युक्त समयमा चन्द्र-गुरुको योग छ भने दुःखी पतिले नरुचाएको हुन्छिन् । यदि चन्द्र-शुक्रको योग छ भने सौता पाउछिन् । शनि र चन्द्रमाको योग भएमा प्रव्रज्या, व्रत सेवा गर्ने हुन्छिन् । कुनै कुनै शौनक आदि ऋषिहरुको भनाइ छ गुरु-चन्द्रको योग भएमा विवाह शुभ हुन्छ भन्न छ ।।२७।।

अधुना मेषादीनां लग्नगतानां फलमाहः-

क्रिये कुमारेष्वनुरक्त चित्ता विहीन वित्ता गर्विगोवृता च ।
कुलद्वयानन्दकरी तृतीये कुलीरलग्ने कुलटा नृशंसा ।।२८।।

क्रियमेष स्तस्मिन् लग्नगते कन्या कुमारेषु बालेष्वनुरक्तचित्ता तद्‌गतमानसा भवति । बालाशक्ता भवतीत्यर्थः। वृषे विहीनवित्ता गोवृता च गौरिव यत्र क्वचन गामिनी भवति। तृतीयो मिथुनस्तस्मिन् कुलद्वयानन्दकरी पैतृके श्वशुरकुले चाऽऽनन्दकरी सुखदा भवति । कुलीरे कर्कटे तस्मिन् लग्नगते कुलटा दुःशीलानृशंसा क्रूरकर्मरता भवति ॥२८॥

भाववोधिनी– मेषलग्नमा विवाह गरिएकी कन्याकुमारहरुसंग अनुरक्त हुन्छिन् । वृषलग्नमा विवाह भएको छभने उपर्युक्त कन्या गरीब र गाईको जस्तो व्रतगर्ने अर्थात् यत्र तत्र डुलिरहने हुन्छिन् । मिथुन लग्नमा विवाह गरिएको छ भने पितृकुल तथा पतिकुल दुबै कुललाई आनन्द दिने हुन्छिन् । यदि कर्कट लग्नमा विवाह गरिएको छ भने कुलटा र क्रूरकर्म गर्ने हुन्छिन् ॥२८॥

परिशिष्टेषु वैशिष्ट्यमाह:--

हरौ प्रसूतासकृदाश्रिता पितुःपतिप्रियाऽति श्वशुरस्य षष्ठभे ।
तुलादिमानार्थवती तुलाधरे तथालिनि क्रन्दति नित्यमस्थिरा ॥२९॥

हरौ सिंहे विवाहिता कन्या सकृदेकवारं प्रसूता पितुराश्रिता भवति । पितृगृहे निवसतीत्यर्थः । षष्ठभे कन्यायां पतिप्रिया भर्तुर्वल्लभा श्वशुरस्यचाति प्रिया भवति । तुलाधरे तुलादि मानेन वणिक्क्रिया तुलाकुडवप्रस्थादिभिर्मानैःक्रयविक्रयेणार्थवती सधना भवति । तथा ऽलिनिवृश्चिके नित्यं सर्वकालमाक्रन्दति रोदत्यस्थिराच भवति ॥२९॥

भाववोधिनी– सिंहलग्नमा विवाहगरिएकी कन्या एउटा सन्तान पाएपछि पितृगृहमानै वस्ने हुन्छिन्। कन्यालग्नमा विवाह भएको छ भने उपर्युक्तकन्या पतिकी अत्यन्त पियारी हुनाको साथै श्वसुराको पनि प्रियपात्र हुन्छिन् । तुलालग्नमा विवाह गरिएकी कन्या व्यापार सम्बन्धी कामबाट धनी तथा मानवती हुन्छिन् । यदि कन्याको वृश्चिकलग्नमा विवाह भएको छ भने सदा रुने कराउने अस्थिर स्वभावकी हुन्छिन् ॥२९॥

परिशेषेष्वाह:--

धनुषि कुलटातत्पूर्वार्द्धे सतीत्यपरेजगुः ।
मृगझषघटेष्वन्याशक्ता जरामुप गच्छति ॥३०॥

धनुषिधन्विनिलग्ने पाणिग्रहंगता कन्या कुलटा असाध्वी भवति । अपरेऽन्येमुनयो देवलादयस्तत्पूर्वार्द्धे धनुषि प्रागर्धे सतीसाध्वीति जगुरुक्तवन्तः ।

चापार्द्धे प्रथमेनारी साध्वी पुत्र धनान्विता ।
अपरे दुःख संतप्ता भ्रमन्ती च रता सदा ॥

मृगघटझषेष्विति । मृगो मकरः घटः कुम्भः झषो मीन एतेषु मृगघटझषेषु । अन्याशक्ता परपुरुषानुरता जरामुपगच्छति, वृद्धभावं यातीत्यर्थः।

अत्र च वात्स्योमुनिः--

मेषांशकोढा कन्या स्यात्कुमार गत मानसा ।
सगौ मुधा वृषभागेस्या द्युग्मांशे शील संयुता ।।
वेश्या कुलीरभागेस्यात्तीव्ररोषा तथैवच ।
सकृत्प्रसूता सिंहांशे पितृवेश्मरता सदा ।।
रूपशीला गुणोपेता कन्यांशे तु कुमारिका ।
वित्तान्विता तुलस्यांशे सुशीला मलविसृता ।।
वाष्पाकुलमुखा नित्यं वृश्चिकांशेऽति कोपना ।
धनुर्धरांशे कुलटा मृगकुम्भझषांशके ।।
सुवृद्धाप्यन्यशक्तास्यात्कन्यानास्त्यत्र संशयः ।

तथा च शौनकमुनिः--

भुङक्ते पुरुषत्रितयं पाणिग्रहगता क्रिये कन्या ।
कामयते वृषभागे गौरिव कामातुरा मनुजा ।।
स्वकुलद्वय वृद्धिकरी विवाहितास्या त्तृतीयगेप्यंशे ।
त्यक्त्वा पति तु विचरति कुलीरभागेऽन्य देशांस्तु ।।
पैतृककुलाऽनुरक्तं सिंहांशोद्वाहिता कन्या ।
धन सौभाग्य समृद्धा भर्तु रता कन्यका कन्या ।।
अत्यर्थ पुत्रवती सुभगा साध्वी तुलांशके ज्ञेया ।
रोदनशीला तीक्ष्णा वृश्चिकभागेऽप्रिया पत्युः ।।
धन्वंशके प्रवृद्धे भर्तारं भृत्यवद्व्रजति नारी ।
मृगभागे पुरुषाणां नयाति तृप्ति सुवृद्धापि ।।
व्यभिचरति कुम्भभागेवितते यज्ञेऽपि दीक्षितानारी ।
सौभाग्यवती चपला प्रहसित वदना च मीनांशे ।।
एवं मेषादिषु लग्नगतेषु प्रत्येकस्य फलमभिहितम् ।।३०।।

भावबोधिनीः– धनुषलग्नमा विवाह गरिएकी कन्या कुलटा हुन्छिन् भन्ने आचार्यको भनाइ छ । देवल आदि मुनिहरुको भनाइ चाहिं धनुषको पूर्वार्द्धमा विवाह भएको छ भने कन्या साध्वी हुन्छिन्, उत्तरार्द्धमा विवाह भएको छ भने उपर्युक्त कन्या कुलटा हुन्छिन् । मकर, कुम्भ तथा मीन लग्नमा विवाह गरिएकी कन्या परपुरुषमा आशक्त हुन्छिन् र चाँडै नै बृद्धावस्थामा पुग्दछिन् ।।३०।।

साम्प्रतं राश्यंशकानामपि नियमःक्रियत इत्याहः--

द्विपदभवन प्रापी योंऽशः स शुभोऽन्य गृहोदये ।
द्विपदभवनेष्वप्यन्यांशा न भवन्ति शुभावहा ॥३१॥

"मिथुन कन्या कुम्भ तुलाधराद्विपदाः" तेषां भवनंद्विपद भवनं प्राप्नोति तच्छिलद्विपद भवन प्रापी, द्विपद भव प्रापी योंऽशः सौम्यग्रहोदयेऽपि शुभो भवति । अंशक ग्रहणे नात्र नवात्मको गृह्यते । एतदुक्तं भवति द्विपदराशि व्यतिरेकेणन्यराशि उदये मेषादि चतुष्पदादिके लग्ने द्विपदराश्यंशः शुभफलदः । द्विपद भवनेषु द्विपद राशि लग्नेष्व-प्यन्यासां मेषादीनां चतुष्पदानां संम्बन्धीनि अशुभावहा भवन्ति । अशुभ फलदा भवन्तीत्यर्थः । एतदुक्तं भवति, सर्वेष्वपिराशिषु लग्नगेषु द्विपदांशक एव शुभफलद इति । न तु मिथुनकन्यातुलाधरधनुषपूर्वार्द्ध कुम्भाः । होराशास्त्रे द्विपदा अभिहिता 'द्विपदभवन प्रापी योंऽश' इत्यत्र द्विपदशब्दे सामान्य निर्दिष्टे कस्मान्मिथुन तुलाधर कन्या एव केवला द्विपदत्वेन व्याख्याता न कुम्भ–धनुः पूर्वार्द्ध इत्यतोच्यते । कुम्भ धनुर्धरावनिष्टफलावभिहितौ । मृग घटझषेष्वन्या शक्ता जरासुपगच्छतीति । मध्य इत्यनिष्ट फलत्वात्कुम्भ धनुर्धराभ्यां तदंशकानां मध्यानिष्ट मिति कृत्वा मिथुनतुलाधर कन्यानामेव द्विपदत्वं व्याख्यातं न कुम्भधनुर्धराभ्यामिति । अमुमेवार्थं विष्णुगुप्त आहः ।

विष्णगुप्तः--

मिथुन तुलाधर कन्या पाणिग्रहणे तु पूजिता लग्ने ।
अन्यर्क्षेऽपि तदंशेष्वल्पा शुभदा भवन्ति ते सर्वे ॥

तथा च रत्नावल्यां आचार्येण स्पष्टतरं निवद्धम् ।

कन्यातुले समिथुने सुरताविलग्ने सौभाग्य वित्त शुभसंपदतीव नार्याः ।
लग्ने ... ... भवनै सुतवित्तहीना नारी विसृज्यपति मिच्छति कामिनोऽन्यान् ॥

षष्ठतौलि मिथुनांशकैः शुभैः सुप्रशस्त भवनोदयेष्वपि ।
स्त्री करग्रहणविधिः प्रशस्यते शुक्र सोम गुरुसंयुतेषु च ॥
एवं मिथुन कन्या तुलानामेव द्विपदत्वम् ।

तथा च वात्स्योमुनिः--

मेशाद्या ये तेषां पूर्वमुक्ता द्वादशराशयः ।
तेषां कन्या तुलाश्चैव मिथुनं च प्रशस्यते ॥
तदंशकेऽथवाऽन्यस्मिन् राशौलग्ने प्रशस्यते ।
तदंशकेऽथवाऽन्य स्मिन् राशौलग्ने प्रशस्यते ।
कन्यातुलाऽथ युग्मेषु लग्नेष्वन्यांशके नतु ॥

एवं मेषांशाऽन्यांको न प्राह्यो द्विपदांशके नैव सर्व एव ते वैवाहिका इतितात्पर्यः ।

तथा च बादरायणः—

कन्यातुलामिथुनानां नवांशकैःशुभफलानिसर्वाणि ।
लग्नानि विवाहविधौ गर्गाद्यैर्मुनिभिरुक्तानि ।।
द्विपदानामन्येषां राशीनामंशकेन परिकल्प्यः ।
तेऽपीह नवांशैः पाणिग्रहणे शुभाः कथिता इति ।।३१।।

भावबोधिनी – द्विपदराशि 'मिथुन कन्या तुला' उपर्युक्त राशित्रय भन्दा अतिरिक्त मेषादि अन्यराशि लग्न भए पनि उपर्युक्त द्विपदराशिको अंश भएमा मात्र विवाह शुभ हुन्छ । तर द्विपदराशि लग्न भए पनि चतुष्पद राशिका अंशमा विवाह गर्न हुँदैन । जुनसुकै राशिको लग्न भएता पनि उपर्युक्त द्विपद राशिको अंश मात्र शुभ फल दिने हुन्छ । उपर्युक्त द्विपद राशिमा धनुर्धरको पूर्वार्द्ध र कुम्भ राशि द्वयलाई उपर्युक्त कर्ममा अशुभ मानेको हुनाले न लिएको हो ।।३१।।

इदानीमादित्यादीनां ग्रहणां लग्नादिस्थानेषुफलं विवक्षु स्तत्रादावेवाऽऽदित्यस्याह ।
भानुर्मृत्युर्नबहुधनतां भर्तृदायादवित्तं बन्धुध्वंसं तनयविरहंभर्तृवृद्धिपराञ्च ।
वैधव्यंस्यान्नलघुमरणं धर्महानिर्विशीलं लाभानेकान् व्ययमपिददात्युद्गमर्क्षात्क्रमेण ।।३२।।

भानुर्मृत्युरिति, भानुरादित्यो लग्नस्थो मृत्युर्मरणं ददाति, द्वितीये न बहुधनतां स्वल्पवित्तत्वं, तृतीये भर्तृदायादाः पतिभ्रातरो वित्तं धनं ददाति । चतुर्थस्थाने बन्धुध्वंसं बन्धुविनाशं, पञ्चमे तनय विरहं पुत्रवियोगं ददाति, षष्ठे परां प्रकृष्टां भर्तृवृद्धिं ददाति । सप्तमे वैधव्यं विधवता पतिमरणं प्राक् शीघ्रं ददाति । अष्टमेऽलघुमरणं चिरञ्जीवीत्वं ददाति । नवमे धर्महानिं धर्मविनाशं ददाति । दशमे वैशील्यं दुष्टशीलतां ददाति, एकादशे अनेकान् बहुप्रकारान् लाभान् ददाति, द्वादशे व्ययं धनक्षतिं, इति शब्दः समाप्तौ, जन्मर्क्ष लग्नराशितः क्रमेण परिवाट्य ददाति ।

तथा च वात्स्योमुनिः—

प्राक्लग्नेऽर्के मृत्युः स्याद्धनहानि द्वितीयगे ।
दुश्चिक्येऽर्थ विवृद्धिः स्याद्बन्धुनाशं चतुर्थगे ।
सुतनाशः सुतस्थे स्याद्भर्तृवृद्धिस्तथारिगे ।
जामित्रस्थे च वैधव्यमायुर्वृद्धि स्तथाष्टमे ।।
धर्मगे धर्महानिः स्यात्कर्मगेऽर्के विशीलता ।।
लाभः स्यादायगे भानौ व्ययं द्वादशगे भवेत् ।।

भावबोधिनी– यदि सूर्य लग्नमा बसेको छ भने कन्याको मृत्यु हुन्छ । द्वितीयस्थानमा सूर्य भएमा साधारण तवरले जीवन निर्वाह गर्ने हुन्छिन् । तृतीयस्थानमा सूर्य बसेको भए देवर जेठाजूबाट लाभ हुन्छ, यदि सूर्य चतुर्थ स्थानमा छ भने बन्धुनाश गर्ने हुन्छिन् । पञ्चम स्थानमा सूर्य भए पुत्रवियोग हुन्छ । सूर्य छैठौं स्थानमा भए पतिको उत्तरोत्तर वृद्धि हुदै जान्छ । सूर्य सप्तमस्थानमा बसेको भए विधवा हुन्छिन् । अष्टम स्थानमा सूर्य भए चिरायु

भएकी हुन्छिन् । नवमस्थानमा सूर्य भए धर्म भ्रष्ट हुन्छिन् । दशमस्थानमा सूर्य भए दुःशीला हुन्छिन् । एकादश स्थानमा सूर्य भए नानाप्रकारका लाभ प्राप्त गर्ने हुन्छिन् । द्वादशस्थानमा सूर्य भए धन नाश गर्ने हुन्छिन् ।।३२।।

अथ चन्द्रस्य लग्नादिद्वादशेषुस्थानेषु फलमाह

शशिन्यश्वा सार्था तदनु सुभगा बान्धव हिता विपुत्रा बन्ध्यार्ता भवति ससपत्नाऽऽशुनिधना ।
जनित्रीकन्यानामथ विहतकर्माऽतिधनिनी व्ययाशक्तेत्येके जगुरशुभदा बन्धुषुजले ।।३३।।

शशिनि चन्द्रमसि लग्नस्थे अश्वा विगतप्राणा भवति मृयत इत्यर्थः । श्वशब्दस्याऽऽत्म वाचित्वात् । अधनेति केचि देतन्न शोभनम् ।

यतः शौनकमुनिः--
लग्नस्थो रजनिकरः कुरुते मृत्युं त्रयोदशे मासे ।

द्वितीये सार्था सधना तदन्तरं तृतीये सुभगा सौभाग्योपेता भर्तृ बल्लभा, चतुर्थे बान्धव हिता बन्धुजनानुकूला, पञ्चमे विपुत्रा पुत्ररहिता अर्थादेव दुहितृयुक्ता, षेठ्ठ बन्ध्या निस्फलाऽऽर्ता पीडीता भवति । बन्ध्याचासावार्ता बन्ध्यार्ता । सप्तमे सपत्नी युक्ता, अष्टमे आशुनिधना शीघ्रमरणा, नवमे कन्यानां जनित्री कन्यामाता, अथानन्तरं दशमेऽविहितकर्मा कुत्सित व्यापारा, एकादशे अतिधनिनी बहुवित्ता, द्वादशे व्ययाशक्ता धनव्ययकरी भवति । इति शब्दः प्रकारार्थे । एके मुनयः शौनकादयो जले चतुर्थस्थाने वन्धुषु अशुभदा भवतीति जगुरुक्तवन्तः

तथाच शौकनमुनिः--
बन्धुश्वशुर वियोगं चतुर्थ संस्थः शशीकुरुते ।।
वात्स्योमुनिः--
चन्द्रे कलिप्रियालग्ने द्वितीये धनिनी भवेत् ।।
तृतीये सुभगा साध्वी बन्धौ बन्धुप्रिया भवेत् ।
सुतस्थे कन्यकामाता षष्ठस्थे मृत्युमाप्नुयात् ।।
जायासंस्थे सपत्नीस्यान्मृत्यो मृत्युमवाप्नुयात् ।।
धन्याप्रजाधिनी धर्मे विकर्मस्था च कर्मिणी ।।
भर्तृप्रियाऽर्थयुक्ता च शशिन्येकादशे भवेत् ।।
व्ययनीद्वादशस्थे स्यात्कन्यका शीत दीधितौ ।।३३।।

भावबोधिनीः– यदि कन्याको लग्नमा चन्द्रमा बसेको छ भने उनको चाँडेन मृत्यु हुन्छ । द्वितीय स्थानमा चन्द्रमा छ भने धनी हुन्छिन्, तृतीयस्थानमा चन्द्रमा भए सुबतीबाग्वले युक्त पतिको अत्यन्त पियारी हुन्छिन् । चतुर्थस्थानमा चन्द्रमा भए बन्धु वर्गको अनुकूल हुन्छिन् । पञ्चमस्थानमा चन्द्रमा बसेको छ भने पुत्रहीन हुन्छिन् ।

षष्ठस्थानमा चन्द्रमा बसेको छ भने बन्ध्या तथा दुःखी हुन्छिन्। सप्तमस्थानमा चन्द्रमा भए सौतालाभ हुन्छ। अष्टमस्थानमा चन्द्रमा भए अल्पायु हुन्छिन्। नवमस्थानमा चन्द्रमा भए कन्यालाभ हुन्छ। दशमस्थानमा चन्द्रमा भए निन्दित कर्म गर्ने हुन्छिन्। एकादशस्थानमा चन्द्रमा छ भने अत्यन्त वैभव भोग्ने हुन्छिन्। द्वादशस्थानमा चन्द्रमा भए विशेष खर्चालु हुनाले दुःखी हुन्छिन्। शौनक आदि मुनिहरुको भनाइ अनुसार चतुर्थस्थानमा चन्द्रमा भए बन्धुहरुका निमित्त अशुभ हुन्छ।

अथ भौमस्य लग्नादिषु द्वादशेषु स्थानेषु फलमाह--:

मृत्युर्नैःस्वं सार्थता बन्धुवैरं नस्युः पुत्रा भर्तृवृद्धि कुमैत्रीम्।
रक्तस्रावो नानुकुल्ये च भर्तुः क्रव्याच्छैल्यं स्वाप्तिनाशं च भौमे ॥३४॥

भौमे अङ्गारके लग्नस्थे मृत्युर्भवति, द्वितीये नैः स्वं निर्धनत्वम्, तृतीये सार्थता सधनत्वं, चतुर्थे बन्धुवैरं बान्धववैरं बान्धवैः सहाप्रीति, पञ्चमे नस्युः पुत्राः सुतान भवेयुः, षष्ठे भर्तृवृद्धि पत्युर्वृद्धि, सप्तमे कुमैत्रीं कुत्सित सङ्गति, अष्टमे रक्तस्रावो रुधिरस्रुतिः, नवमे अङ्गारके भर्तुः पत्युर्नानुकूल्यं परपति अनुकूलता, दशमे क्रव्याच्छैल्यं हिंसन स्वभावम्, क्रव्यं पक्वाऽपक्वमांसमत्तीति क्रव्याद। एकादशे स्वाप्तिः धनप्राप्तिः, द्वादशे तन्नाशः, आप्तिश्च नाशश्च आप्तिनाशौ स्वाप्तिनाशाविति।

तथा च वात्स्यामुनिः--

वैधव्यं लग्नगे भौमे कन्या वा मृत्युमाप्नुयात्।
अग्निचौरा भयार्तास्याद् द्वितीयस्थे धरासुते ॥
तृतीयस्थेऽर्थ संपन्ना बन्धुद्विष्ठा चतुर्थगे ॥
पुत्रहीना सुतस्थस्या दरिगे सुतभागिनी ॥
सप्तमस्थे महीपुत्रे पुंश्चली खलसङ्गता।
असृक्स्रुति धरापुत्रे मृत्युस्थे कन्यकाप्नुयात ॥
नवमे भर्तृविद्विष्ठा दशमे कुहक प्रिया।
धनान्विता भवेदाये नष्टस्वा व्ययगे भवेत् ॥३४॥

भावबोधिनी-मङ्गललग्नमा वसेको छ भने कन्याको मृत्यु हुन्छ। द्वितीयस्थानमा मङ्गलवसेको छ भने गरीब हुन्छिन्, तृतीयस्थानमा मङ्गल छ भने सुख सौभाग्य भोग्ने हुन्छिन्, चतुर्थ स्थानमा मङ्गल बसेको भए भाई बन्धुमा कलह गराउने हुन्छिन्, पञ्चमस्थानमा मङ्गल छ भने पुत्रहीन हुन्छिन्। षष्ठस्थानमा मङ्गल छ भने पतिको उत्तरोत्तर उन्नति गराउने हुन्छिन्। सप्तमस्थानमा मङ्गल छ भने खराब चाल चलन भएका व्यक्तिसँग संपर्क राख्ने हुन्छिन। अष्टम स्थानमा मङ्गल भएमा रक्तसंबन्धि रोगले पीडित हुन्छिन्। नवम स्थानमा मङ्गल छ भने परपुरुष सँग संबन्ध राख्ने हुन्छिन्। दशमस्थानमा मङ्गल छ भने हिंसागर्ने प्रकृतिकी हुन्छिन्। एकादशस्थानमा मङ्गल वसेकोछ भने सुखभोग भोग्ने हुन्छिन्। द्वादश स्थानमा भौमवसेको छ भने फजूल खर्च गर्ने हुन्छिन् ॥३४॥

अथ बुधस्य लग्नादिस्थस्य फलमाह:--

भर्तृव्रता सुगृहिणी पतिपक्षपूज्या बन्ध्वर्चिता बहुसुता विजितारिपक्षा ।
बन्ध्याऽव्यसुर्नियमदान कृशाङ्गवित्ता मायावती धनवती व्ययनीय सौम्ये ।।३५।।

सौम्ये बुधे लग्नस्थे भर्तृव्रता पतिव्रता साध्वीकन्या भवति, द्वितीये सुगृहिणी शोभनगृहिणी, तृतीये पतिपक्ष पूज्या भर्तृपक्षेऽर्चनीया देवरान्र्चिता, चतुर्थे बन्ध्वर्चिता बन्धुपूजिता, पञ्चमे बहुसुता प्रभूत पुत्रा षष्ठे विजितारिपक्षा विजितोऽरिपक्षोययया, सप्तमे बन्ध्या निष्फलाऽऽआर्ता वा, अष्टमे व्यसुर्विगता विपन्ना असवो यस्या । नवमे नियमदान कृशाङ्गवित्ता नियमेन व्रतोपवासादिना दानेन सत्पात्रार्थप्रतिपादेन न यत्कृशाङ्गवित्ते शरीरधने यस्याः सा तथोक्ता, वृतदान तत्परेत्यर्थः । दशमे मायावती मायायुक्ता, एकादशे धनवती सधना, द्वादशे बुधे व्ययनी सव्यया च भवति ।

अत्र च वात्स्योमुनि:--

लग्नस्थे चन्द्रपुत्रे स्याद्धर्मज्ञा सुप्रजास्थिरा ।
स्वकुटुम्बरतानित्यं धनस्थे सोमनन्दने ।।
श्वश्रूः श्वशुरयोः पूज्या तृतीयस्थे शशाङ्कजे ।
चतुर्थे बन्धु पूज्यास्यात्सुभगा धनसंयुता ।।
बहुपुत्रा सुतस्थेस्याद्धतशत्रु स्तथारिगे ।
कष्टापदमवाप्नोति पुत्रहानिं तथैवच ।
सप्तमस्थेऽष्टमस्थे च रोगार्ता दुःख भागिनी ।।
तपोरता धर्मगेस्यान्मायाशीला चकर्मगे ।।
सुतभृत्य धरोपेता लाभगेद्वादशे भवेत् ।
कन्यासुव्ययसंयुक्ता शशाङ्कतनये सदा ।।

भावबोधिनी--बुधलग्नमा बसेको छ भने कन्या पतिव्रता हुन्छिन्, द्वितीयस्थानमा बुध छ भने सुयोग्य गृहिणी हुन्छिन् । तृतीयस्थानमा बुध भए पतिपक्षका देवरानी-जेठानीहरुले आदर भाउ गर्दछन् । चतुर्थस्थानमा बुध बसेको छ भने बन्धुवर्गबाट पूजिन्छिन् । पञ्चमस्थानमा बुध छ भने छोरा-छोरी प्रशस्त हुन्छन्, षष्ठस्थानमा बुध बसेको भए शत्रुवसमा पर्ने हुन्छन् । सप्तमस्थानमा बुध छ भने बन्ध्या र दुःखी हुन्छिन्, अष्टमस्थानमा बुध छ भने अल्पायु हुन्छिन्, नवमस्थानमा बुध छ भने व्रत र दान तथा उपवास गर्नाले शरीर तथा धन दुवैबाट दुब्लाएको हुन्छिन् । दशम बुध छ भने मायाविनी छल कपट गर्ने हुन्छिन् । एकादशस्थानमा बुध छ भने धनी हुन्छिन्, द्वादशस्थानमा बुध बसेको छ भने फजुल खर्च गर्ने हुन्छिन् ।।३५।।

अथ जीवस्य लग्नादिस्थस्य फलमाह:--

पत्युःप्रियाऽति धनिनी मुदिता धन्याढ्या पुत्रान्विताहतपरा नसमेति भर्ता ।
क्षीणायुषा शुभरता शुभसिद्धकार्या स्वायान्विता तदुभयोपकृता च जीवे ॥६॥

जीवे बृहस्पतौ लग्नस्थे कन्या पत्युः प्रिया भर्तृवल्लभा भवति, द्वितीयेऽति धनिनी महाधनोपेता, तृतीये मुदिता हर्षिता, चतुर्थे धनाढ्या वित्तवती, पञ्चमे पुत्रान्विता सुतयुक्ता, षष्ठे हतपरा शत्रुघातिका:, हताः परा यया इति कृत्वा । सप्तमे नसमेति भर्ता पतिना सहन संयुज्यते पतिप्रिया नभवतीत्यर्थः । अष्टमे क्षीणायुषा प्राप्तमरणा, नवमे शुभरता धर्मसंयुक्ता दशमे शुभसिद्धकार्या, शुभंसिद्धं कार्यं यस्याः सा तथोक्ता, एकादशे स्वायान्विता स्वकीयेनाऽऽयेन धनेनान्विता संयुक्ता, द्वादशे तदुभयोपकृता तत्स्वायमुभयत्रेहलोकं परलोकं चोपकृतं यस्या सा तथोक्ता ।

अत्र च वात्स्योमुनिः--

गुरौ लग्नगते कन्या धर्मशीलबहुप्रजाः ।
सुदीर्घमायुः प्राप्नोति धनगे धनिनी भवेत् ॥
अतिप्रमुदिता जीवे दुश्चिक्यस्थे भवेत्सदा ।
स्वबन्धु वृद्धिजननी सर्वकाम गुणान्विता ॥
सुशीलास्याच्चतुर्थस्थे पञ्चमस्थे बहुप्रजा ।
सपत्नी घातिनी षष्ठे बद्धमूला स्ववेश्मनी ॥
विरूपा दुर्भगा भर्तु द्विष्टनित्यं च सप्तमे ।
जीवेऽष्टमस्थे दुःखार्ता पञ्चत्वं यातिकन्यका ॥
नवमे सुभगा साध्वी बिभर्ति विमलं यशः ।
शुभकर्मसुसंसिद्धि प्राप्नोति दशमे गुरौ ॥
विचित्रमाल्याभरणा पुत्रयुक्ता चकन्यका ।
सुवर्णमणिवस्त्राद्या भरण्येकादशे गुरौ ॥
व्ययस्थे सततोदारा ददात्यर्थमयन्त्रिता ॥३६।

भावबोधिनी–लग्नस्थानमा बृहस्पति बसेको छ भने पतिबल्लभा हुन्छिन् । द्वितीयस्थानमा बृहस्पति भए धन सम्पत्तिले युक्त भएकी हुन्छिन् । तृतीयस्थानमा बृहस्पति भए सदा प्रसन्न रहने हुन्छिन्, चतुर्थस्थानमा गुरुभए धनमानले सुसम्पन्न हुन्छिन्, पञ्चमस्थानमा बृहस्पति भए पुत्रपौत्रादिले युक्त भएकी हुन्छिन् । षष्ठस्थानमा गुरुभएशत्रुलाई दवाउने हुन्छिन्, सप्तमस्थानमा बृहस्पति भए पतिले नरुचाउने हुन्छिन् । अष्टमस्थानमा बृहस्पति भए अल्पायु हुन्छिन् । नवमस्थानमा गुरुभए धार्मिक हुन्छिन । दशमस्थानमा बृहस्पति भए शुभकाम गर्ने र हरेक काममा सफलता हासिल गर्ने हुन्छिन् । एकादशस्थानमा गुरुभए आफ्नै कमाईबाट धनिक हुन्छिन् । द्वादशस्थानमा गुरुभए आफुले कमाएको सम्पत्तिबाट यसलोक र परलोकलाई पनि असल हुने काम गर्दछिन् ॥३६॥

अथ शुक्रस्य लग्नादिस्थस्य फलमाह:-

प्रियापत्यु र्लुब्धा पतिसहजशक्ता कुलहिता
सुपुत्रा वैराढ्या तदनु कुलटा क्षिप्रनिधना ।
रतानित्यं धर्मे बहुकुशल कर्मण्यभिरता
भवत्याय प्राया क्षपित विभवा चेति भृगुणा ।।३७।।

भृगुणा शुक्रेणयुक्ते लग्ने कन्या पत्युः प्रियाभर्तृवल्लभा भवति, द्वितीये लुब्धा लोभसंपुक्ता, तृतीये पतिसहजशक्ता भर्तृभ्रातृणां देवराणामनुरक्ता, चतुर्थे शुक्रे कुलहिता कुलानुकूला, पञ्चमे सुपुत्राशोभनपुत्रावेतिकेचित्पठन्ति । षष्ठे वैराढ्या वैरबहुला, तदनु सप्तमे कुलटा असति, अष्टमेक्षिप्रनिधना शीघ्रमरणा नवमेरता नित्यं धर्मेसततं धर्मरता दशमे बहुकुशलकर्मण्यभिरता बहुकुशलत्वं च तत्कर्म प्रभूत श्रेयो यस्मात्कर्मणा तत्राऽभिरताशक्ता च भवति प्रभूत कुशलकर्मकर्ता, एकादशे भवत्यायप्राया आयो धनं प्रायो बाहुल्येन यस्याःसा तथोक्ता अर्थागमबहुला, द्वादशे क्षपित विभवा नष्टैश्वर्या इति शब्द प्रकारा ।।

अत्र च वात्स्योमुनिः--

आयुर्धनसुतैर्युक्ता लग्नस्थे भृगुनन्दने ।
प्रभूतगुणयुक्तास्या कृपणा च धनाश्रिते ।।
पुंश्चली देवररता कन्या शुक्रे तृतीयगे ।
यशसा भूषिता कन्या सुरूपा सधनै र्युता ।।
नित्य चतुर्थगे शुक्रे पञ्चमस्थे बहुप्रजा ।
पत्युः सबन्धुवर्गाद्या वैराढया षष्ठगे भृगौ ।।
बन्धकी सप्तमस्थे स्याद्भार्गवे लोकगर्हिता ।
व्याध्यर्दितात्रजेच्छुक्रे मृत्युस्थे यमसादनम् ।।
भार्गवेनवमस्थे स्याद्धर्मयुक्ता प्रियंवदा ।
सत्कर्मयुक्ता दशमे शुक्रे भर्तृपरायणा ।।
विविधार्थाऽन्विताकन्या भवत्येकादशे भृगौ ।
व्ययस्थे भार्गवे कन्या व्ययशीला भवत्यति ।।३७।।

भावबोधिनी–पहिलग्नमा शुक्रबसेको छ भने कन्या पतिबल्लभा हुन्छिन् । द्वितीयस्थानमा शुक्र भए लोभि हुन्छिन्, तृतीय स्थानमा शुक्र छ भने देवरसँग अनुचित संबन्ध राख्ने हुन्छिन् । चतुर्थ स्थानमा शुक्र भए कुललाई उज्ज्वल पार्ने हुन्छिन् । पञ्चमस्थानमा शुक्र भए असलपुत्र भएकी हुन्छिन् । षष्ठस्थानमा शुक्र भए धेरै शत्रु भएकी हुन्छिन् । सप्तमस्थानमा शुक्र छ भने व्यभिचारिणी हुन्छिन् । अष्टमस्थानमा शुक्र छ भने अल्पायु भएकी हुन्छिन् । नवम स्थानमा शुक्र छ भने धर्मात्मा हुन्छिन् । दशमस्थानमा शुक्र भए प्रत्येक कार्यमा सफल हुन्छिन् । एकादशस्थानमा शुक्र भए धन सञ्चय गर्ने हुन्छिन् । द्वादश स्थानमा शुक्र छ भने धनहीन हुन्छिन् ।।३७।।

अथ लग्नादिस्थस्य सौरस्य फलम् :-

पुंश्चल्यस्वा बहुधनवती स्वल्पदुग्धार्कपुत्रे
हृद्रोगाऽऽर्ता विनिहतपरा गर्भविस्राव शीला ।।
रोगान्मुक्ता स्खलित नियमा पापशीलाऽतिवित्ता
पानैरर्थान्नयति विलयं प्राविलग्नात्क्रमेण ।।३८।।

अर्कपुत्रे शनैश्चरे लग्नगते कन्या पुंश्चली असती भवति । द्वितीये अस्वा निर्धना, तृतीये बहुधनवती अतिवित्तान्विता, चतुर्थे स्वल्प दुग्धा अल्पक्षीरा, पञ्चमे हृद्रोगार्ता हृदयरोगपीडिता, षष्ठे विनिहतपरा विनिहतापरा शत्रवो यया, सप्तमे गर्भविस्रावशीला, गर्भविस्रावणं स्वभावो यस्याः अप्रसववती । अष्टमे रोगान्मुक्ता रोगरहिता स्वस्थशरीरा, नवमे स्खलित नियमा भग्नप्रतिज्ञा, दशमे पापशीला पापाचारा, एकादशेऽतिवित्ता, प्रभूतधना, द्वादशे सौरे पानैर्मद्यप्रशक्तार्था धना विलयं विनाशं नयति । एवमेतानि फलानि क्रमेणाऽनुपूर्वा प्राग्विलग्नादिति ।

अत्र च वात्स्योमुनिः-

सौरे लग्नगते कन्या पुंश्चली दुर्भगाकृशा ।
निर्धना कृपणा दीना धनस्थेऽर्कात्मजे भवेत् ।।
अर्थै रनेकैः संयुक्ता सुभगा च तृतीयगे ।
स्वल्पदुग्धा चतुर्थस्थे भास्करस्यात्मजे भवेत् ।।
पुत्रहीनाऽति दुःखार्ता हृद्रोगेण च पीडिता ।
पञ्चमस्थेऽथ षष्ठस्थे सुप्रजा हतशत्रवः ।।
गर्भस्रावार्दिता नित्यं सप्तमस्थेऽर्कनन्दने ।
अष्टमस्थेऽर्कपुत्रे स्या न्नित्य सामय वर्जिता ।।
नष्टधर्मस्थिता कन्या धर्मस्थेऽर्कात्मजे भवेत् ।
पापशीला जनद्विष्ट सौरे स्याद्दशमाश्रिते ।
एकादशेऽर्कपुत्रे स्यात्कन्या सर्वार्थ संयुता ।
मद्यपानरता नित्यं व्ययस्थेऽर्कात्मजे भवेत् ।।३८।।

भावबोधिनी – यदि शनि लग्नमा बसेको छ भने कन्या पथभ्रष्टा हुन्छिन् । द्वितीय स्थानमा शनि छ भने गरीब हुन्छिन्, तृतीय स्थानमा शनि भए धनी हुन्छिन् । चतुर्थ स्थानमा शनि छ भने स्तनबाट दूध कम आउने हुन्छिन् । पञ्चमस्थानमा शनि भए हृदयरोगले पीडित हुन्छिन् । षष्ठस्थानमा शनि बसेको छ भने शत्रुको संहार गर्ने हुन्छिन् । सप्तमस्थानमा शनि बसेको छ भने भ्रूण हत्या गर्ने हुन्छिन् । अष्टम स्थानमा शनि छ भने निरोगी हुन्छिन् । नवमस्थानमा शनि छ भने नियम भङ्गगर्ने हुन्छिन् । दशमस्थानमा शनि छ भने पाप कर्ममा रत हुन्छिन् । एकादशस्थानमा

शनिबसेको छ भने ऐश्वर्य भोग्ने हुन्छिन् । द्वादशस्थानमा शनिवसेको छ भने मद्यपान आदि असतखान – पानबाट धननाश गर्ने हुन्छिन् ।।३८।।

अधुनातदेव कुण्डलिकाफलं सर्वसंग्रहेणाहः–

सौम्या व्ययास्तनिधनं त्र्यरिभं च शुक्रे हित्वा स्थित स्त्रिधनलाभ गतः शशाङ्कः ।
पापात्रिषड्निधन लाभ गता विवाहे हित्वाऽष्टमं क्षितिजमिष्ट फलानि दद्युः ।।३९।।

सौम्याः शुभग्रहाः, बुधजीवशुक्राः व्ययास्त निधनं द्वादशसप्तमाष्टम स्थानं हित्वा त्यक्त्वाऽन्यत्र स्थिताः । व्ययास्तनिधन मिति समहारे द्वन्दः । त्र्यरिभं च शब्दात् व्ययास्तनिधनं त्र्यरिभं च हित्वा शुक्रःस्थितोऽन्यस्थानेषु । त्रिधनलाभ गतः शशाङ्कः चन्द्रः त्रिधनलाभगत स्तृतीयधनैकादशस्थः । पापा अशुभाः सूर्यभौमसौराः त्रिषड्निधन लाभगताः तृतीयषष्ठाष्टमैकादशस्थाः । अत्राङ्गारकस्य विशेषमाह । हित्वाष्टमाक्षितिज मङ्गरकमष्टमं हित्वा त्यक्त्वा एषु स्थानेषूक्तेषु सर्वं एवं स्थिता विवाहे पाणिग्रहे इष्टानि शुभानि फलानि दद्युः । अर्थात् उपर्युक्त स्थान स्थिताः ग्रहाःशुभाः ।।३९।।

भावबोधिनी– शुभ ग्रहहरु जस्तै बुध र बृहस्पति द्वादशसप्तम–अष्टम स्थानलाई छाडेर अन्य स्थानमा बसेकाछन् भने उपर्युक्त दुवै ग्रह विवाहका निमित्त शुभफल दिने हुन्छन् । शुक्र–द्वादश, सप्तम, अष्टम, तृतीय षष्ठ स्थानलाई छाडेर अन्य स्थानमा बसेको छ भने विवाहमा शुभफल दिने हुन्छ । द्वितीय तृतीय, एकादश स्थानमा चन्द्रमा बसेको छ भने विवाहका निमित्त शुभ हुन्छ । त्यस्तै पाप ग्रह सूर्य शनि तृतीय षष्ठ अष्टम एकादश स्थानमा बसेका छन् भने विवाहमा शुभ हुन्छ भन्ने लेखिएको छ । मङ्गल तृतीय, षष्ठ, एकादश स्थानमा बसेको छ भने उपर्युक्त कामका निमित्त शुभ हुन्छ ।।३९।।

अथ जीवशुक्रयोर्विशेषफलमाहः–

सुतहिबुकवियद्विलग्नधर्मेष्वमरगुरुर्यदि दानवार्चितो वा ।
यदशुभ मुपयातितच्छुभत्वं शुभमपि वृद्धिमुपैति तत्प्रभावात् ।।४०।।

अमरगुरुः बृहस्पतिर्दानावार्चितः शुक्रः अननोर्मध्यादेको यदा सुतहिबुकवियद्विलग्न धर्मेषु पञ्चम चतुर्थदशम प्राग्लग्नं नवमस्थानानामन्यतमस्थाने संस्थितो भवति, तदाऽन्यग्रहवत्तं यदशुभं फलं तच्छुभत्वं प्राप्नोति । एतदुक्तं भवति यदि जीव शुक्रो वा सुतादेः स्थानस्थो भवति तदान्य ग्रहेष्वशोभनेष्वपि विवाहःकार्यः शुभमपि वृद्धिमुपैति तत्प्रभावात्, शुभमपि यत्फलं तत्तत्प्राभावात्तद्वशाद्वृद्धिमुपैति ।।

अत्र च वात्स्योमुनिः–

मूर्तिकर्मात्मजसुख त्रित्रिकोण गते गुरौ ।
भार्गवेवापि नश्यन्ति सर्वे दोषाःविलग्नजा ।।
उत्पाताब्दादि जातश्च पाणिग्रह कर्मणि ।।४०।।

भावबोधिनी - पञ्चम, चतुर्थ, दशम, लग्न नवम स्थानमध्ये कुनै स्थानमा बृहस्पति अथवा शुक्र मध्ये कुनै एउटा मात्र पनि बसेको छ भने कुनै अन्य ग्रहबाट अशुभ फल देखिन आए पनि उपर्युक्त ग्रहका प्रभावले विवाह कर्मका निमित्त शुभफलमा नै परिणत हुन्छ । यदि अन्य ग्रहहरुबाट शुभ देखिन्छ र गुरु शुक्र दुवै अथवा एउटा मात्र पनि उपर्युक्त स्थानमा बसेको छ भने विवाहमा उत्तमोत्तम फल प्राप्त हुन्छ ।।४०।।

अत्र चन्द्रस्य विशेषतरं फलमाह:-

अनिष्टस्थान संस्थोऽपि प्रशस्त फलदः शशिः ।
सौम्यभागेऽधिमित्रेण बलिना चेन्निरीक्षितः ।।४१।।

अत्रापि शब्दः संभावनायां वर्तते । अनिष्टस्थानान्यशोभनानियेषु स्थानेषु चन्द्रस्याऽशुभ फलं परिपठितम्, तथा शशिन्यम्बा लग्ने पञ्चमे विपुत्रा, षष्ठे वन्ध्या, सप्तमे ससपत्नी, अष्टमे अप्राणा निधना, नवमे जनित्रीकन्यानां, दशमे अविहतकर्मा, द्वादशे व्ययाशक्ता । एतेष्वनिष्ठस्थानेषु अपि स्थितः शशी चन्द्रो तत्कालाधिमित्रेण दृष्टो भवति तदा प्रशस्त फलदो भवति । किं पुनरिष्टस्थानस्थ इति ।

तथा च वात्स्योमुनिः:-

अनिष्ट गृहयातोऽपि प्रशस्त फलदः शशिः ।
सौम्यांशकस्थो मित्रेण दृश्यते चेद्बलीयसा ।।

अत्रान्यै र्मुनिभिश्चन्द्रमसो जामित्र गतै र्ग्रहैः शुभाऽशुभ फलमुक्तम् । तच्च आचार्येण कस्मान्नोक्तमित्यत्रो च्यते ।

उक्तमेवजातके-

उत्सृष्टातरणौ कुजेतु बिधवा बाले स्तराशिस्थिते
कन्यैवा शुभ वीक्षितेऽर्कतनये द्यूनेजरां गच्छति ।
आग्नेये विधवास्तराशि सहिते मिश्रैः पुनर्भू भवेत् ।।

इत्येवं चन्द्रमसः सप्तम स्थानानां पाप सौम्यांनां शुभाशुभंज्ञेयम् । यत स्तत्र लग्नात्सप्तम स्थस्य चन्द्रफलं मास्त्यत्र "उद्वाहेवरण विधौ" इत्युक्तं तत्प्रदर्श्यते ।

तथा च वादरायणः:-

उभयकुलानन्दकरी सुतसुख सौभाग्य वित्तसंपन्ना ।
ऊढानारी चन्द्रे बलिनि शुभस्थान संस्थे च ।।
यद्युपचय संस्थाबलिन स्तारा ग्रहा विवाहविधौ ।
अबलस्थ रजनिकर्ता तत्राप्यूढा न वृद्धिकरी ।।

सोमात्मकाहि नारी यस्मात्संकीर्तिता मुनिभिः ।
तस्मादितरबलेभ्य श्चन्द्रबलं शस्तमिच्छन्ति ॥
शशिनः सप्तमसंस्थे दिवसकरे लोकसंयुताकन्या ।
भौमे पतिघातकरी रवितनये बन्धकी भवति ॥
राहौ भर्तुरनिष्टा केतोर्वंशक्षयाय निर्दिष्टा ।
बुधभार्गव सुरमन्त्रिषु पतिप्रिया सुपुत्रिणी साध्वी ॥
तथा च देवलः–
कुमुदपतेः जामित्रे यदा ग्रहाः पापवर्जिताः सौम्याः ।
कुर्वन्ति पुत्रसंपत्कनकधनप्रमोदाश्च ॥
योनिविनाशं भौमो राहुर्मरणं यमश्च दासत्वम् ॥
दौर्भाग्यं कमलपतिः केतुर्वैधव्यकृतं द्यूने ॥
वात्स्योमुनिः स्वकेन्द्रे सर्वस्मिन्नपि पापग्रहानेच्छन्ति ।
तथा च वात्स्योमुनिः–
चतुष्टयस्थः शीतांशोर्भवेत्पापग्रहो यदि ।
तदा कन्या सुदुःखार्ता भवत्यूढा नशंसयः ॥
सौम्ये चतुष्टयगते शीतांशोः सुखिता भवेत् ।
तस्मात्सौम्य ग्रहोनित्यं चन्द्रकेन्द्रेषु कारयेत् ॥

अत्रापि गुरुशुक्रास्तमय केतु दर्शनादयः सर्व एव यथा संभवमन्यत्र योजनीयास्तथा च तत्रोत्तरे पठचते ।

अस्तंगते भृगुसुते कन्यामरणं गुरोस्तुपुरुषस्य ।
उभयोरपिमरणं स्याद्यद्युद्वाहे दिवाकेतुरिति ॥
तथा च देवलः–
गुरावस्तमिते कन्या मृत्युः परिणयेद्ध्रुवम् ।
तथैवास्तमिते शुक्रे यातु सा परिणीयते ॥
एवंविधेऽपि संप्राप्ते विवाहे गुरुशुक्रयोः ।
नतत्र च भवेद्दोषाः शशाङ्केऽभ्युदिते सति ॥
तथा च वादरायणः–
अस्तमिते देवगुरोः पाणिग्रहणे नरस्य मरणंस्यात् ।
भृगुपुत्रे कन्याया स्तस्मात्तावुद्गतौ सबलौ ॥

बलसंयुक्ते शशिजे विपुलमयूखेऽष्टवर्ग संशुद्धे ।
शस्तं पाणिग्रहणं नोद्गतयो रपि च जीवभार्गवयोः ।।

तथा च शौनकमुनिः-
सौभाग्य जीवन धनक्षयं व्रजत्यस्तगते गुरोः पुंसाम् ।
भृगुतनये च स्त्रीणामस्तमिते देवलप्राह: ।।

एतत्सर्वं विवाहे विचार्यमिति ।

तथा च वशिष्ठः-
व्रतबन्धं द्विजातीनामुद्वाहं सुन्दरीषु च ।
गुरावस्तगते नित्यं नकुर्याद्भार्गवे तथा ।।
विवाहे व्रतबन्धे च यात्रायां गृहकर्मणि ।
गुरावस्तमिते शुक्रे ध्रुवं मृत्यु र्विनिर्दिशेदिति ।।४१।।

भावबोधिनी-अनिष्टस्थानमा चन्द्रमा बसेको छ भने, जस्तै लग्नमा चन्द्रमा छ भने अल्पायु हुन्छिन्, पञ्चमस्थानमा चन्द्रमा छ भने पुत्रहीन हुन्छिन्, षष्ठस्थानमा चन्द्रमा भए बन्ध्या हुन्छिन्, सप्तमस्थानमा चन्द्रमा भए सौता पाउँछिन्, अष्टमस्थानमा चन्द्रमा छ भने मृत्यु हुन्छ, नवमस्थानमा चन्द्रमा भए कन्या मात्र हुन्छन्, दशमस्थानमा चन्द्रमा भए निन्दित कर्म गर्ने हुन्छिन् । द्वादश स्थानमा फजूल खर्च गर्ने हुन्छिन्, चन्द्रमा उपर्युक्त निन्दित स्थानमा बसेको छ तापनि शुभग्रहका नवांशमा छ र बलियो शुभग्रहले र तात्कालिक अधिमित्रले देखदछ भने त उपर्युक्त चन्द्रमा प्रशस्त फल दिने हुन्छ । यदि शुभस्थानमा बसेको छ भने त के भन्न पर्‍यो र ।।४१।।

अधुना विवाहे ग्रहबलाद्विशेषफलमाह:--
नरग्रहबले स्त्रीणां पुमान् भवति बल्लभः ।
विपरीतेऽङ्गना भर्तु रर्थादन्यत्प्रकल्पयेत् ।।४२।।

नरग्रहाः पुरुषग्रहाः रविकुजजीवाः तेषु बलवत्सु विवाहकाले स्त्रीणां योषितां पुमान् मनुष्यो बल्लभः प्रियो भवति । विपरीतेऽङ्गना भर्तु रिति, विपरीते स्त्रीग्रहयोश्चन्द्रशुक्रयोर्बलवतो रङ्गना स्त्री भर्तु पत्युर्बल्लभा भवति । अर्थादन्यत्प्रकल्पयेत्, अर्थात्सामर्थ्यादिन्यदपरं च कल्पयेदूहयेत्, उभयबलैः परस्परं बलवत्त्वं विबलत्वञ्च येषां मध्य बलत्वे माध्यस्थमिति ।।४२।।

भावबोधिनी—विवाहका समयमा रवि, मङ्गल, बृहस्पति उपर्युक्त पुरुषग्रहबलवान् छन् भने स्त्रीले पतिलाई अत्यन्त मनपराउँछिन्, यदि चन्द्रमा र शुक्र स्त्रीग्रह बलिया भएमा पतिले पत्नीलाई अत्यन्त प्रेम गर्दछ । यदि पुरुष तथा स्त्रीग्रहदुवै बलिया छन् भने परस्परमा अतिशय प्रेम गर्दछन् । दुवै पक्षकाग्रह मध्यबलि भएमा सामान्य प्रेम हुन्छ । पुरुषग्रह तथा स्त्रीग्रह दुवै हीन बली भए काम चलाउ प्रेम हुन्छ ।।४२।।

अथ शुक्रसूर्यास्ताधिपानां विशेष फलमाह:--

शुक्रसूर्यास्तपतिषु शत्रुभे वा तदंशके ।
विरोधमूढा यात्याशु श्वस्त्रु श्वसुर भर्तृषु ।।४३।।

शुक्रो भार्गवः सूर्योऽर्कः अस्तपतिर्येन लग्नेन पाणिग्रहणं तस्मात् सप्तमराशेर्योऽधिपतिः सोऽस्तपतिरित्युच्यते । शुक्रश्च सूर्यश्चास्तपतिश्च शुक्रसूर्यास्तपतयः तेषु शत्रुभे शत्रुराशौ स्थितेषु तदंशकेषु वा शत्रुनवांशके संस्थितेषु, तदोढा कृतविवाहा कन्या यथा संख्यमाशु क्षिप्रमेव श्वस्त्रु श्वसुर भर्तृषु विरोधं याति प्राप्नोति । शुक्रे श्वस्त्रु विषये, सूर्ये श्वसुरविषये, अस्तपतौ भर्तरि, एतदुक्तं भवति, शुक्रे शत्रुराशिस्थिते तदंशके व्यस्थिते वा श्वस्त्रु सह विरोधं प्राप्नोति, एवं सूर्ये श्वसुरेणसह अस्तपतौ भर्त्रासह, ननु यदिदंरिपुसंज्ञ राशि व्याख्यानं क्रियते, तत्किं रिपुसंज्ञितराशिस्थाः शुक्रसूर्यास्तपतयः तदंशकस्था वा श्वस्त्रु श्वसुरभर्तृभिः सहविरोधं नयन्ति । उक्त रिपुग्रह राशिस्था इति । उच्यते रिपुराशिस्थानां च तावत्फलमभिहितमाचार्यैः ।

तथा च शौनकमुनिराह:–

दस्पत्यो बैरकरः षष्ठः शुक्रस्त्रिभिर्वर्षैः ।।

इति भावकल्पनायां लग्नात्षष्ठस्यराशेरिपुरिति संज्ञा ।

तथा च हारितः--

लग्नात्षष्ठः शशाङ्को जनयति मरणं भार्गवो वैरमुग्रमिति ।

आचार्येण विलग्नादि यथा संख्यं भावफलमभिहितम्

प्रिया पत्युर्लुब्धा पतिसहजशक्ता कुलहिता ।
सुपुत्रा वैराढ्या (इति ३७ श्लोक)

एत चेत्षष्ठराशिस्थाग्रहा विरोधं नयन्ति । वयं चात्रब्रूमः, अपवाद वाक्यमेतत् । यथा रिपुग्रहराशिस्थो विरोधामयत्यन्यस्था फलमभिहितमिति । एवं पुनरभिधानेन द्विरुक्तता दोषं प्राप्नोतीदमेव प्राक्व्याख्यानम् ।

विष्णुगुप्त आह:–

श्वस्त्रु याति विरोधं शुक्रे रिपुराशिगे तदंशेवा ।
श्वसुरेणैवं च रवौ जामित्रेशच पत्येव ।।

अत्रापि संदिग्धमेव किं पुनर्ग्रहराशिस्थ विरोधं च यात्युत रिपुसंज्ञितस्थानइत्यत्र मन्दबुद्धिनां भ्रान्त्यपनयनार्थं मपवाद सूत्रंस्पष्टार्थं विष्णुगप्त आह ।

विष्णुगुप्तः--

इष्टर्क्षेऽपि च वैरं जीवे शुक्रे चशत्रुभागस्थे ।।
लग्ने द्विपदे प्येवं स्वशत्रु विवलांश लग्नगते ।।

स्वशब्द निर्देशात्त्विदमवगम्यते, यथा रिपुग्रहराशिस्थो वा विरोधं नयति ।

तथा च वात्स्योमुनिः–
जामित्रनाथे शत्रुस्थे कन्योढा पतिवैरिणी ।
श्वस्त्रुश्वसुरयोःशुक्रसूर्यौ च शत्रुभाश्रितौ ।।
तथाच शौनकमुनिः–
श्वसुरःसतस्त्रकिरणः श्वस्त्रुर्भृगुतनय एवंनिर्दिष्टः ।
होरागम चन्द्रबले जामित्रपति स्त्रीणामिति ।।४३।।

भावबोधिनी— जुन लग्नमा विवाह गरिन्छ त्यस लग्न देखि सप्तमस्थानलाई अस्त र त्यसको स्वामिलाई अस्तस्थानको स्वामि मानिन्छ। विवाह कुण्डलीमा सूर्य शत्रुराशिमा अथवा त्यसको नवांशमा छ भने श्वसुरासंग चाँडै नै वैरभाव हुन्छ। शुक्र शत्रुराशि वा उसको नवांशमा छ भने सासुसंग वैरभाव हुन्छ । सप्तमस्थानको स्वामि शत्रुगृही छ भने अथवा त्यसको नवांशमा बसेको छ भने चाँडै नै पतिसंग वैरभाव हुन्छ ।।४३।।

अथ लग्नास्तयोरंशकशुद्धौ विशेषफलमाहः--
विलग्नांशः स्वनाथेन यद्युद्वाहे नदृश्यते ।
पुंविनाशस्ततोऽस्तांशे यद्येवं योषितस्तथा ।।४४।।

विलग्नस्यांशेः विलग्नस्यांशः येनांशकेन विवाहो निवर्त्यते स विलग्नांशः स च यदि स्वनाथेनात्मीय पतिनोद्वाहकाले न दृश्यते 'एतदुक्तं भवत्यंशक संज्ञोराशि यदि स्वपतिना नदृश्यते तदा पुंविनाशः पुंसो मरणं भवति। ततऽस्तांशो यद्येवं ततः स्वस्मात् विलग्नांशादस्तांशः सप्तमस्थो नरभागो यद्येवं, एवं सादृश्ये यदि स्वपतिना नदृश्यते इत्यर्थः ।तदा योषितः कन्याया विनाशो भवतीति । अत्र केचिल्लग्नराशौ स्वराश्याधिपतिना दृष्टांशके दृष्टावदन्ति कथयन्ति तथाऽस्तराश्यस्तांशकाधिपतिनादृष्टेऽस्तांशके दृष्टं वर्णयन्ति ।

तथा च तद्वाक्यम्:--
अंशेशाऽदृष्टेलग्ने पुंसोमरणंबध्वा अस्ते ।
एतदाचार्यस्य नाभिप्रेतं यस्मा दनेनैव जातके उक्तः–
शिल्पित्र्यंशे शशिसुतयुते केन्द्र संस्थार्किदृष्टे ।

शशिसुनोबुधः स च यस्मिन् त्र्यंदेस्काणे स्थितः त्र्यंशः सशिसुतयुतः तस्मिन् लग्ने केन्द्रस्थेनार्किनासौरिणा दृष्टेऽवलोकितेशिल्पि जात इति, अत्र चरराशौदृष्ट इति ज्ञेयः ।

तथा च वात्स्योमुनिः–

विलग्नांशः स्वनाथेन विबाहे चे न्न दृश्यते ।
पुंविनाशो भवेत्पूर्वमेवमस्तांशको यदि ।।
दृश्यते न स्वपतिना विनाशः स्यात्स्त्रियास्ततः ।।

तथा च सिद्धार्थः–

योंऽशकःकल्पितो लग्ने स चेत्स्वाम्यवलोकितः ।
तदा पुंसः शुभंविन्द्यात्सप्तमांशे तथास्त्रियः ।।४४।।

भावबोधिनी– विवाह जुन राशिको लग्नमा र जुन नवांशमा गरिन्छ त्यस नवांशको स्वामिले उपर्युक्त अंशको राशिलाई विवाहका समयमा देख्दैन भने वरको मृत्यु हुन्छ । जुन नवांशमा विवाह भएको छ त्यसबाट सप्तमस्थानस्थ नवांशलाई उपर्युक्त नवांश राशिको स्वामिले देख्दैन भने बधूको मृत्यु हुन्छ ।।४४।।

अथ जीवशुक्रयो र्विवाहे उच्चस्थयो र्जीवसौम्ययोश्च विशेषमाहः--

गुरुसितयोरुच्चगयोरेकतमेवा विलग्नगे कन्या ।
राज्ञी भवत्यसंशयमेव गुरुसौम्ययो श्चोढा ।।४५।।

गुरुः जीवः सितः शुक्रः एतयो र्द्वयोरप्युच्चस्थयो र्यत्र तत्रावस्थितयो र्लग्नकाले कन्या ऊढा परिणीता राज्ञी राजमहिषी भवति । अशंसयः निः संदिग्धमेव, एतच्च जातिकुलदेशान् बुध्वा वक्तव्यम्, अथवा तयोरेव गुरुसितयो- रेकतमे एकस्मिन् उच्चस्थे विलग्नगे लग्नस्थिते च कन्या राज्ञी भवति । एवमनेनैव प्रकारेण गुरुसौम्ययोरपिराज्ञी र्भवति । गुरुसौम्ययोः जीवबुधयोरप्युचस्थयो र्यत्र तत्राऽवस्थितयो र्लग्नकाले कन्योढा राज्ञी भवति । अथवा तयोरेव गुरुसौम्ययो रेकस्मिन् उच्चस्थो लग्नगते च कन्या राज्ञी भवति ।

अत्र च वात्स्योमुनिः–

उच्चस्थयोः सुराचार्य दैत्यपूजितयो र्भवेत् ।
ताभ्यामेकतमे लग्ने राज्ञीभाव मवाप्नुयात् ।।
एवमेव सुराचार्य बुधयोः कन्यका भवेत् ।।४५।।

भावबोधिनीः– जुन समयमा विवाह गरिन्छ त्यस लग्नकुण्डलीमा बृहस्पति–शुक्र आफ्ना उच्चराशिमा बसेका छन् भने उपर्युक्त समयमा विवाह गरिएकी कन्या रानी हुन्छिन् अथवा विवाह लग्न कुण्डलीमा बृहस्पति वा शुक्र जुन सुकै एउटा उच्च भएपनि त्यस समयमा विवाह गरिएकी कन्या रानी हुन्छिन् । त्यस्तै विवाह कुण्डलीमा बृहस्पति तथा बुध उच्च छन् भने त्यस समयमा विवाह गरिएकी कन्या रानी हुन्छिन् । विवाह लग्न कुण्डलीमा बृहस्पति वा बुध एउटा मात्र पनि उच्च भएका समयमा बिवाह गरिएकी कन्या रानी हुन्छिन् ।

उपर्युक्त श्लोकमा रानी हुने जुन् योग उल्लेख गरिएको छ त्यस योगमा विवाह गरिदैमा सबै रानी हुने हैनन् । आफ्ना कुलमा अथवा आफ्ना जिल्लामा सबैभन्दा श्रेष्ठ हुन्छिन् । जस्तै अन्यान्यका दृष्टिमा रानी सम्मान देखिन्छिन् । जस्तै सबै कुराबाट पुगिसरि आएको हुनाले सबैले मान मर्यादा गर्ने उदाहरण स्वरूप हुन्छिन् । ।।४५।।

अधुना चतुर्थिका विधानमाहः-

स्वजामित्रोदये लग्ने शुभे कार्या चतुर्थिका ।
स्ववर्ण सदृशा जारा स्त्र्याद्यैरेकर्क्ष संस्थितैः ॥४६॥

स्वजामित्रोदये लग्ने स्त्रियः जन्मलग्नाज्जन्मराशेर्वा सप्तम स्थानं स्वजामित्रमुच्यते । तदुदये लग्ने सोऽस्तराशि र्यदा लग्नगतो भवति तस्मिंश्च शुभे शुभग्रह संयुक्ते शुभग्रहाणां मध्यादेकेन द्वाभ्यां वा युते त्रिभिर्दोषा भिधानात् चतुर्थिका कार्या, चतुर्थिकेभिः कन्याकुमारयोः संप्रयोगस्य संज्ञा । त्र्यादिभिर्दोषमाहः ।

स्ववर्णसदृशा जारा स्त्र्याद्यै रेकर्क्ष संस्थितैः ।

त्र्याद्यै स्त्रिप्रभृतिभिर्ग्रहै स्त्रिभि श्चतुर्भिः पञ्चभिर्वा एकर्क्षे संस्थितैरेकराश्यवस्थितैः स्ववर्ण सदृशा जारा उपपतयोर्भवन्ति, यो यस्यग्रहस्यब्राम्हणादिवर्ण उक्तः ।

यथा-

जीव सितौ विप्राणां क्षत्रस्यारो सूर्यो विशां चन्द्रः ।
शूद्राधिपः शशिसुतः शनैश्चरः शङ्कर भवानामिति ॥

तत्सदृशा जारा भवन्ति । एतदुक्तं भवति, प्रथमं संप्रयोगकाले त्रिप्रभृतिभिर्ग्रहैरेकस्थानस्थैः ग्रहसदृशवर्णान् जारान् करोति ।

तथा च वात्स्योमुनिः-

वैवाहिके भेदे शुभस्यांशे तिथौ शुभे ।
जामित्रराशौ कन्याया लग्ने शुभ समन्विते ॥
चतुर्थिकां प्रयुञ्जित विधिदृष्टेन कर्मणा ।
चरुणा तर्पयेद्देवान् हुताशन पुरोगमान् ॥
स्वाधिष्ठितान् गानुत्सृज्य कन्ययाः प्रतिपादिते ।
शय्यारोहण कालेतु कुमार्या भं विचारयेत् ॥
जीवो वा भार्गवो वापि यदास्याद् ग्रहसंगतः ।
त्रिप्रभृत्येक राशिस्थै रन्यै र्वापि ग्रहै र्भवेत् ॥
जारा शक्ताङ्गना नित्यं बलवद्ग्रह जातयः ॥

तथा च वादरायणः-

पाणिग्रहणं कथितं यथा क्रमं शास्त्रसारमुद्धृत्यः ।
वक्ष्याम्यतः परमहं चतुर्थिका संप्रयोग विधिम् ॥
दिवसत्रयं सभार्यः कुशास्तरे शुक्लवस्त्र संवीतः ।
मातृवदाश्लिष्य सतीं यथा क्रमं पर्युपासीत ॥

उक्तानि यानि पूर्वं विवाह संपत् कराणि लग्नानि ।
स्नाता सम्मुक्तकेशी प्रतिशरवस्त्रा निवद्ध लोहकरी ॥
सिद्धार्थक कृतरक्षा प्रशस्तमधिवासयेद्भवनम् ।
प्राप्ते तु चतुर्थदिने रात्रौ समलङ्कृता विधानेन ॥
कौशेय रक्तवसनामुपविश्यैव योजयेत्कन्याम् ॥
भौमे पूर्वविलग्ने क्षतजप्राया ऽऽतुरा भवति कन्या ।
सौरे गर्भविहीना कर्मपरा बन्धकी चैव ।
सूर्ये दुर्गतबन्ध व्याधिश्लिष्टा च दीनवस्त्रा च ॥
शुक्रेणाऽऽभवरणवती बहुबित्ता भर्तृ बल्लभा भवति ।
जीवेव पुत्रिणीस्याद्बुद्धि च निपुणाऽनु रक्ताशक्ता च ॥
वैकृत गर्भस्राव संयोगे राहु केतु चन्द्राणाम् ।
सौम्यास्त्रयोऽपिनेष्टालग्ने संयोग कालिकेनित्यम् ॥
ग्रहवर्ण समा जारा स्त्वाद्यै रेकर्क्षगैः कुरत इति ॥
तथा च देवलः-
संवेशने यदा जीवः सोमजोवा भृगोः सुतः ॥
त्याद्यै रुक्त स्तदा जारा बलवद्ग्रह जातय इति ॥४६॥

भावबोधिनी- जन्मलग्न अथवा जन्मराशिबाट सप्तमस्थानलाई जामित्र स्थान भनिन्छ। जुनसमयमा उपर्युक्त जामित्रराशि लग्न हुन आउँदछ र त्यसमा एक वा दुई शुभग्रह वसेका छन् भने चतुर्थि कर्म गर्न शुभ हुन्छ। यदि उपर्युक्त लग्नमा दुई भन्दा अधिक शुभ ग्रह वा शुभ पापग्रहहरु तीन-चार वसेका छन् भने ग्रहको जाती र धर्म अनुसारका उपर्युक्त कन्याका उपपति हुन्छन् ॥४६॥

इदानीं चरभवन मित्यादिना परमतमुपन्यस्य तदेव दूषयतिः-
चरभवनगतं विहाय सत्यः शशिनमुवाच शुभप्रदं विवाहे ।
मुनिवचन विरोधि तच्च सूत्रे ननु कथिते पवनर्क्ष वैश्वदेवे ॥४६॥

शशिनं चन्द्रं चरभवनगतं चरराश्यवस्थितं विहाय वर्जयित्वाऽन्यत्र स्थिरद्विस्वभाव गतंशुभप्रदं सत्याचार्य- उवाचोक्तवान् ।

तथा च सत्याचार्यः-
जामित्रे ग्रहाचरिते शुभेक्षिते द्विपदयोर्निजे लग्ने ।
कार्यं पाणिग्रहणं चरराशिगं हित्वा ॥

एतद्दूषयति मुनिवचन विरोधि तच्चेति । तच्च सत्याचार्योक्तं मुनिवचन विरोधि, मुनिवचनेन पूर्वाचार्य वचनेन सहविरुध्यते । यतः 'मृगशिरशि मघायां' इत्यादिके सूत्रे मुनिप्रोक्ते पवनर्क्ष वैश्वदेवेनतुकथिते, नत्वियं निपातः. प्रश्ने पवनर्क्ष वैश्वदेवउत्तराषाढा ते चात्र विवाहसूत्रे कथिते ।

तथा च वात्स्योमुनिः–

उत्तरात्रितयं सौम्य प्राजापत्यं तथाऽनिल ।
हस्तोमूल मघामैत्रं पूषादैवत मेवच ।।
विवाहे निर्दिशेद्धर्मयशोऽर्थो दैववित्सदा ।
अस्मिन् नक्षत्र सङ्घाते या कन्या परिणीयते ।।
जन्माऽनुकूले सा पुत्र सुखसौभाग्य भागिनी ।
एवं स्वात्युत्तराषाढा सर्वत्र कथिते च ते ।।

तत्रस्थःचन्द्रमाचरगृहस्थो भवति तस्मात्अयुक्त मेतत् ।।४७।।

भावबोधिनी— चरराशिमा बसेको चन्द्रमालाई छोडेर स्थिर तथा द्विस्वभाव राशिमा बसेको चन्द्रमा शुभ हुन्छ भन्ने सत्याचार्यको मत छ । तर मुनिहरुले मृगशिरा र मघाको चन्द्रमालाई लिएका छन्. स्वाती र उत्तराषाढा तथा उपर्युक्त नक्षत्रद्वयलाई पनि सत्याचार्यले विवाह सूत्रमा उल्लेख गरेनन् । अतः मुनिहरुको बचन र पूर्वाचार्यहरुको मतमा विरोध देखियो । उपर्युक्त नक्षत्रको चन्द्रमा चरराशिको हुने हुनाले सत्याचार्यको मत मान्न सकिदैन । ।।४७।।

उक्तस्योपसंहारार्थं वक्ष्यमाणस्य प्रस्तावार्थमाहः–

राश्युद्गम द्वादश राशिचक्रे युक्ता विवाहा मुनिभिः प्रदिष्टा ।
नामानि चक्रे ग्रहयोग लग्ने श्रीदेवकीर्तिः श्रृणुतस्य चाऽऽर्या ।।४८।।

राशिनां मेषादीनां उद्गमा उदयाः द्वादशराशिरुपे चक्रे तत्र च मुनिभिः वात्स्य प्रभृतिभि विवाहा युक्ता शोभनाः प्रदिष्टा उक्ता। तच्च "द्विपद भवन प्रापीयोंऽशः शुभोऽन्य गृहोदया" इत्यादिना प्रतिपादिताः । एतदुक्तं भवति, मेषादय एवं राशयो यथा तथा द्विपदानांशकोदये ग्रहकुण्डलीका शुद्धौ सत्यां वैवाहिका इति । श्रीदेवकीर्ति नामाचार्यः ग्रहयोग लग्ने, ग्रहैर्योगो ग्रहयोग लग्ने ग्रहसंयुक्त मेषादौ लग्ने, नामानि संज्ञा चक्रे कृतवान् । तस्य चार्या श्रृणु । आर्या वृतविशेषस्ता श्चाऽऽर्या श्रृण्वा कर्णय इति । ।।४८।।

भावबोधिनी— मेष आदि राशिहरूको उदय द्वादशराशिचक्ररूपमा हुन्छ भनेर वात्स्य आदि मुनिहरुले उपर्युक्त राशिहरुको लग्नमा विवाह शुभ हुन्छ भनेका छन् । मेषादि राशिहरु लग्न भएथा जसरी तसरी द्विपद राशिको अंश उदय भएका समयमा यदि ग्रहकुण्डली शुद्ध हुन्छ भने विवाह शुभ हुन्छ भन्दछन् । देवकीर्ति नामका आचार्यले ग्रहबसेका मेषादि लग्नको नाम तल लेखिएको आर्या छन्दमा बताएका छन् । ।।४८।।

अधुना तदीयाभिरे वाऽऽर्याभि विवाह नामान्युद्दिशतिः–

नन्दो भद्रो जीवो जीमूतः स्थावरो जयो विजयः ।
व्यालो रसातलमुखः क्षयस्तमो ऽन्स्यो विवाहपणः ।।४९।।

एतानि विवाहगण नामानि नन्दः भद्रः, जीवः, जीमूतः, स्थावरः जयः विजयः व्यालः, रसातलमुखः क्षयः, तमः, अन्त्य एष विवाहगणो विवाहसमूहः । ।।४९।।


१. नन्दयोगः




२. भद्रयोगः



३. जीवयोगः




४. जीमूतयोगः




५. स्थावरयोगः



६. जययोगः



७. विजययोगः




८. व्यालयोगः




९. रसातलयोगः



१०. क्षययोगः



११. तमयोगः



१२. कृतान्तयोगः



उपर्युक्त विवाह गण हुन् ।।४९।।

अधुना क्रमेणैषां लक्षणमाहः--

सौम्ये विलग्ने नन्दःशुक्रे भद्र स्तथा गुरौ जीवः ।
आद्यन्तौ जीमूतः स्थावर इति मध्यमा न्त्याभ्याम् ।।५०।।

सौम्ये त्रिलग्नइति । सौम्ये बुधे बिलग्ने लग्नस्थे नन्दो नामयोगः एवं शुक्रे भद्रः गुरौ बृहस्पतौं लग्नस्थे जीवः! आद्यन्तौ जीमूतइति प्रथमर्थ एकोक्तः, आद्यो बुधः अन्त्यो जीवः एतौ सौम्यजीवौ यदि लग्नस्थौ भवतः तदा जीमूतः, स्थावर इति मध्यमान्त्याभ्यां मध्यमः शुक्रः अन्त्यो जीवः एताभ्यां लग्नगताभ्यां स्थावर : बुध शुक्राभ्यां लग्नगताभ्यां जयः सर्वै स्त्रिभिरेव सौम्यशुक्रजीवै रुदयस्थैलग्नगतै विजयो नाम योगः ।५०।।

भावबोधिनी– विवाहलग्नमा बुध बसेकोछ भने नन्दनामको योग हुन्छ, यदि शुक्र छ भने भद्रनामको योग हुन्छ, त्यस्तै बृहस्पती लग्नमाछ भने जीवनामको योगहुन्छ। बुध र बृहस्पति लग्नमा वसेका छन्भने जीमूत नामको योग हुन्छ, शुक्र र बृहस्पति भए स्थावर नामको योग हुन्छ, बुध र शुक्र लग्नमा भए जयनामको योग हुन्छ, यदि बुध शुक्र, बृहस्पति तीनै ग्रह लग्नमा वसेका भए विजय नामको योग हुन्छ ।।५०।।

अथ शुभयोगानाह :--

सौम्यैरथ तैर्वा रवि भौमशनैश्चरैः क्रमशः ।।५०½।।

एवं सप्त नन्दादयो योगाः सौम्यैः शुभग्रहै बुध जीव शुक्रैः कथिता अथाऽनन्तर मितरैः पापग्रहै रथ शब्द स्वार्थौ केचिद्रविभौम शनैश्चरैः सूर्याङ्गारकशनिभिः क्रमशः परिपास्पा भवन्ति ।।५०½।।

भावबोधिनी–माथि लेखिएका सातयोग त बुध बृहस्पति, शुक्र उपर्युक्त शुभग्रहबाट बताइयो यी बाहेक रवि, भौम, शनि, राहु, केतु आदि पाप ग्रह विवाह लग्नमा बसेमा निम्न लिखित योग हुन्छन् ।।५०½।।

अत्र सामान्येन लग्नफलमाह ;--

सौम्यैः ज्ञेया सौम्या क्रूराः क्रुरैः समाख्याता ।।५१।।

सौम्यैः शुभग्रहै बुधजीव शुक्रैः सौम्याः शोभना एव योगा ज्ञातव्या । क्रूरैः पापग्रहैः, आदित्य भौमशनिराहु-केतुभिः क्रूरा अशुभा समाख्याता उक्ता ।।५१।।

भावबोधिनी शुभग्रह बुध बृहस्पति शुक्र विवाहलग्नमा बसेका छन् भने शुभयोग हुन्छन् । लग्नमा रवि, भौम, शनि, राहु केतु वसेका छन् भने योग पनि खराब त्याज्य हुन्छन् ।।५१।।

अथाऽशुभैर्व्यालादि योगपञ्चकमाह :--

दिनकरयोगाद् व्यालो भौमेन रसातलः क्षयः शनिना ।
तमसा तमो निरुक्तोऽथान्त्येकेतो कृतान्तश्च ।।५२।।

दिनकरः सूर्यः तद्योगत्वेन युक्ते लग्ने व्यालो नामयोगः, भौमेनाङ्गारकेन युक्तं रसातलःशनिना शनैश्चरयुक्ते क्षय स्तमसा राहुणा युक्ते लग्ने तमोनिरुक्तस्तम इति नाम योगानि विशेषेणोक्तः कथितः । अथानन्तरं केतोर्लग्न स्थितेऽन्त्यःकृतसंज्ञः कृतान्तस्व कृतान्त इत्यस्य परनाम । अथान्त्ये भवोऽन्त्य इति । ननुकेतुनाम कथं लग्ने युज्यते । उच्यते यदा लग्नकाले केतुरुदेति तदा केतु युक्तो लग्नो भवति अथवा लग्नराशि नक्षत्रे यदा केतुर्दृश्यते ।।५२।।

भावबोधिनीः– विवाहलग्नमा सूर्य बसेको छ भने व्यालनामको योग हुन्छ, यदि मङ्गलबसेको भए रसातल नामको योग हुन्छ । उपर्युक्त लग्नमा शनिवसेको छ भने क्षयनामको योग हुन्छ, राहु छ भने तमनामको योग हुन्छ, केतु लग्नमा छ भने कृतान्त नामको योग हुन्छ ।।५२।।

अथ नन्दादीनां योगानां विशिष्ट फलमाह:--

त्रिषुनन्दादिषु राज्ञी चतुर्षु चातः परं महादेवी ।
व्यालाद्येषु च पञ्चषु विधवाः शोच्या दरिद्राश्च ।।५३।।

त्रिषुनन्दादियोगेषु नन्द, भद्र, जीव संज्ञितेषु विवाहिता कन्या राज्ञी भवति । राजमहिषी भवति । अतोऽस्माद्योगत्रयात् परमनन्तरं चतुर्षु जीमूत स्थावर जय विजयाख्येषु महादेवी महाराज्ञी भवति । स्वकुलोत्कृष्टा भवति 'इति' यावत् । 'बुध्वा वा याति कुलदेशानिति वचनात्' । व्यालादिषु च पञ्चषु व्यालो रसातलमुखः क्षयः तमः अन्त्य संज्ञेषु विधवा भर्तृ रहिता, शोच्या शोचनीयप्रायाः दरिद्रा विधवा भवति ।।५३।।

भावबोधिनी– नन्द, भद्र, जीव यो तीन योगमा बिबाह गरिएकी कन्या रानी हुन्छिन् । उपर्युक्त योगभन्दा वाहेकका जीमूत स्थावर जय विजय चार योगमा विवाह गरिएकी कन्या महारानी हुन्छिन् अथवा आफ्नाकूलकी श्रेष्ठनारी हुन्छिन् । व्यालयोगमा विवाह भयो भने विधवा हुन्छिन, रसातल योगमा विवाह भयो भने परित्यक्ता हुन्छिन्। क्षय योगमा विवाह भयो भने शोचनीय अवस्थाकी हुन्छिन् तमयोगमा विवाह भयो भने दरिद्र हुन्छिन् । कृतान्त योगमा विवाह भयो भने विधवा हुन्छिन् ।।५३।।

अथ चन्द्रस्यविशेषमाह:--

अनधिकृतः शुभकृत्स्या वेते चन्द्रोऽन्यथाऽधिकृतः ।
तस्मात् विवाहसमये न केन चित्सङ्गतः शशीधन्यः ।।५४।।

एतैः प्रागुक्तैर्नन्दादिभिर्योगैः सामर्थ्यात्तत्कर्तृभिरनधिकृतः अयुक्तः चन्द्रमा शुभफलकृत्स्यात् भवति । शुभफलं करोतीति शुभफलकृत् । अन्यथाऽधिकृतः अधिकृतो युक्तः एतैरेव ग्रहै रन्यथाऽशुभफलकृदित्यर्थः । तस्मा ेतोर्विवाहसमये पाणिग्रहण कालेशशी चन्द्रो न केनचिद्गतः संयुक्तो धन्यः प्रशस्त फलदः ।५४।।

भावबोधिनी–पूर्वोक्त नन्दादि योगकारक ग्रहका साथमा चन्द्रमा बसेको छ भने अशुभ फलदाता हुन्छ । उपर्युक्त योगकारक ग्रहका साथमा छैनं भने शुभ फल दिने हुन्छ । अतः विवाहका सम्बन्धमा चन्द्रमा अर्काको साथमा छैन र एक्लै बसेको छ भने अतीव शुभ फल दिने हुन्छ ।।५४।।

अथ विवाहादन्यत्र शोभन इत्याह:–

सप्तते शशियोगा. सौम्या. सह सर्वकर्म सिद्धिकराः ।
अशुभफलदास्तु पापैः पत्युद्वहने विवर्ज्यास्ते ।।५५।।

एते सौम्यैर्बुधजीवसितैः सह ये नन्दादयः सप्तयोगास्ते शशियोगाः शशिना चन्द्रेण सहयोगाः शशियोगाः । अथवा शशियोगात् शशियोगाद्धेतोः सर्वेषु कर्मषु गर्भाधानादिषु सिद्धिकराः शुभप्रदाः शुभफलं ददाति । ते ते च शशिसंबन्धाः पत्युद्वहने विवाहे विवर्ज्या वर्जनीयाः । एतदुक्तं भवति नन्दादयश्चन्द्रयुक्ता विवाहर्वजितेष्वन्येषुकार्येषु शोभना विवाहे पुनः सर्वथा विवर्ज्या इति ।।५५।।

भावबोधिनी–पूर्वोक्त बुध जीव शुक्रद्वारा बन्ने नन्दादि जुन सातयोग हुन्, उपर्युक्त सात योगमा यदि योगकारक ग्रहका अतिरिक्त चन्द्रमा बसेको छ भने त विवाहमा सर्वथा त्याग गर्नु पर्दछ । विवाह भन्दा अतिरिक्त कार्यमा भने चन्द्रमा ग्राह्य छ ।

पुनरप्यत्रविशेषमाह--

तस्मा देतान् योगान्मतिमां सञ्चिन्त्य सर्वकार्येषु ।।५५½।।

सर्वकार्येषु बलवत्सु मौञ्जीवन्धन गृहप्रवेशादिषु बलवत्स्ववलेषु चूडाकरणेषु युञ्जीत प्रयुञ्जीत किन्त्वन्यत्र तु विवाहात् । विवाहात्पाणि ग्रहणादन्यत्र तद्वर्जयित्वेत्यर्थः ।।५५½।।

भावबोधिनी– उपर्युक्त चन्द्रमा सहितका नन्दादिसात योग बलवान् भएमा मौञ्जिबन्धन, गृहप्रवेश आदि सबै कर्ममा शुभ हुन्छ । उपर्युक्त बलहीन छन् भने चूडाकर्म आदिमा दिनु । धेरै के भनु विवाहकर्मलाई छोडेर अरु सबै कर्ममा दिए हुन्छ ।।५५½।।

इदानीं नन्दादीनां योगानां फलं विवक्षु स्तत्र तावन्नन्दस्याह ।

ऊढा नन्दे कन्या देवीशब्दं समाप्नुया दचिरात् ।।५६।।

भवति नरेन्द्र जननी भर्तुः प्राणैःप्रिया चैव ।।५६½।।

उढा परिणीता नन्दे नन्दारव्ये योगे कन्याकुमारी देवी शब्दं श्री महादेवीति शब्दं नाममरिचा च्छीघ्रमेव समाप्नुयात् प्राप्नोति । तथा नरेन्द्रस्य राज्ञो जननी माता च भवति । भर्तुः प्राणै र सुभि रधिका प्रियावल्लभा भवति । ।।५६½।।

नन्दयोगमा विवाह गरिएकी कन्या चाँडै नै 'महारानी' कहलाउछिन् र आपना पतिकी प्राणप्रिया भएर कालान्तरमा राजमाता हुन्छिन् । ।।५६½।।

अथ भद्रस्याऽऽहः--

भद्रे पाणिग्रहणे यदि नामकुमारिका समुययाति ।।५७।।

सा त्वरिता न्नृपशब्दं करोति भर्तुः कुलस्यापि ।।५७½।।

भदे भद्रयोगे पाणिग्रहणं विवाहं यदि नामेति अतिशयेन संभावानायां वा यदि कुमारिका कन्या समुपयाति प्राप्नोति, सा त्वरिता च्छीघ्रमेत नृपशब्दं राजसंज्ञां भर्तुः पत्युः करोति, न केवलं भर्तुः पत्युः करोति नकेबलं भर्ता यावत् कुलस्य वंशस्यापीत्यपि शब्दार्थः । ।।५७½।।

भावबोधिनी— भद्रयोगमा बिबाह गरिएकी कुमारीले आपना पतिलाई चाँडैनै राजा बनाउद छिन् र त्यस्तै पतिकुलको उन्नति गराउँद छिन् । ।।५७।।

अथ जीवस्याऽऽहः–

परिणीता जीवाख्ये कन्या विजयाय कीर्त्यते भर्तुः ।।५८।।

प्राप्नोति सा त्रिवर्गं कुलद्वयं चापि नन्दयति ।।५८½।।

कन्या कुमारी जीवारव्ये जीवसंञ्ज्ञिते योगे परिणीता कृत विवाहा भर्तुः पत्युर्विजयाय जयार्थं कीर्त्यते । विशेषेण जयो विजय सा च त्रिवर्गं धर्मार्थकामान् प्राप्नोति लभते, कुलद्वयं पितृकुलं भर्तृकुलं च नन्दयत्यानन्दयति ।।५८½।।

भावबोधिनी– जीवयोगमा विवाह गरिएकी कन्याले पतिको हरेक काममा विजय गराउँद छिन् । धर्म अर्थ काम तीनै वर्ग आनन्दपूर्वक भोग गर्दछिन् र पितृकुल तथा पतिकुललाई आनन्दित पार्दछिन् ।।५८½।।

अथ जीमूतस्याऽऽह:–

जोमूते परिणीता बिपुलान्भोगान् महाफलान् भुक्त्वा ।।५९।।
दृष्ट्वाच नप्तृतनयान् सहभर्त्रा देवत्वम् ।।५९½।।

जीमूते जीमूताख्ये योगे परिणीता विवाहिता कन्या विपुलान् विस्तीर्णान् प्रभूतकालस्थायिन इत्यर्थः, भोगानुपभोगान् महाफलान् प्रकृष्ट फलान् भुक्त्वा तथा नप्तृतनयान् पौत्र पुत्रान् दृष्ट्वाऽवलोक्य भर्ता सह सार्धं देवत्वं स्वर्गं याति प्राप्नोति अथवा पञ्चत्वं मृत्युं याति ।।५९½।।

भावबोधिनी – जीमूतनामक योगमा विवाह गरिएकी कन्या धेरै भौतिक भोग गरेर पनातिको मुख हेरेर आफना पतिका साथै देवलोकमा जान्छिन् ।।५९½।।

अथ स्थावरयोगस्याऽऽह:--

स्थावरयोगे कन्या पाणिग्रहमेत्य विपुलमैश्वर्यम् ।।६०।।
भर्तुर्निधानलाभान् प्राप्य कुलस्योन्नतिंकुरुते ।।६०½।।

स्थावरयोगे स्थावराख्येयोगे कन्या कुमारी पाणिग्रहणं बिवाहमेत्य प्राप्य भर्तुः पत्यु निधानलाभाद्धेतोः। 'परेभूमौ यः स्थापितं धनं तं निधान शब्देनोच्यते ।' बिपुलं विस्तीर्णमैश्वर्यमाद्यं तं प्राप्य लब्ध्वा कुलस्य वंशस्योन्नति-मुन्नतत्वं कुरुते । उत्कृष्ठतां करोतीत्यर्थः ।।६०½।।

भावबोधिनी– स्थावरयोगमा बिवाह गरिएकी कन्याले बिपुल ऐश्वर्यको भोग गर्दछिन् । उपर्युक्त कन्याका पतिलाई जमीनमा गाडेको निधि प्राप्त हुन्छ र त्यसै धनबाट पतिकुलको उन्नति हुन्छ ।।६०½।।

अथ जयस्यफलमाह:--

पाणिग्रहमेत्य जये जघन्य कुलजापि भर्तुरैश्वर्यम् ।।६१।।
आवहति सदा कन्या निषेव्यमाना सपत्नीभिः ।।६१½।।

जये जयाख्ये योगे पाणिग्रहणमेत्य प्राप्य कन्या जघन्य कुलजा अपि निकृष्टवंशजाऽपि भर्तुः पत्युरैश्वर्यमावहति प्रापयति किं पुनः प्रधानकुलजाताऽपि शब्दस्यार्थः । सदा सर्वकालं निषेव्यमाना सपत्नीभि र्भवति । सपत्नीनां मध्ये ज्येष्ठा भवतीत्यर्थः ।।६१½।।

भावबोधिनी – जययोगमा विवाह गरिएकी कन्या यदि नीचकुलमा उत्पन्न भएकी भए पनि, उपर्युक्तकन्याले पतिलाई अखिल ऐश्वर्यको भोग भोग्ने बनाउँछिन् । धनी र उच्च कुलकी भएत झन् के भन्नु छ र । उपर्युक्तकन्यालाई सौताहरुले दासीसमान भएर आदर-भाउ गर्दछन् ।।६१½।।

अथ विजयस्याहः--

विजयां प्राप्योद्वाहं प्राप्नोति सुतान् यशोऽर्थं लाभं च ।।६२।।
वंशस्य च प्रतिष्ठां परतो मरणाच्च सुरलोकम् ।।६२½।।

विजये विजयाख्ययोगे उद्वाहं विवाहं प्राप्य कन्या, सुतान् पुत्रान् यशः कीर्तिरर्थं लाभं धनागमञ्च प्राप्नोति लभते । वंशस्यप्रतिष्ठां प्रसिद्धि प्राप्नोति, अत्रापि संवध्यते मरणात् मृत्योः परत अनन्तरं सुरलोकं प्राप्नोति ।।६२½।।

भावबोधिनी – विजययोगमा विवाह गरिएकी कन्याले छोरा छोरी कीर्ति यश धनको उपभोगका साथै वंशको प्रतिष्ठा पनि बढाउँद छिन् र यस लोकमा सुख भोग भोगेर अन्त्यमा देवलोक प्राप्त गर्दछिन् ।।६२½।।

अथव्यालयोगस्य फलमाहः--

व्याले व्यालाकारा पाणिग्रहमेति कन्यका दैवात् ।।६३।।
दारिद्र्यामय युक्ता नैकस्मिन् पुंसि सा रमते ।।६३½।।

व्याले व्यालयोगे कन्यका कुमारी दैवादात्मकर्मवसात् पाणिग्रहणं विवाहं एत्य प्राप्य व्याला सर्पसदृशरूपा भवति हिंस्रेत्यर्थः । तथा दारिद्र्याः दारिद्र्यामय युक्ता भवति, दारिद्र्यं निर्धनत्वं आमयो रोग स्ताभ्यां युक्ता समेता भवति । सा च कन्या पुंसि पुरुषे एकस्मिन् नरमते न युज्यति बहुपुरुषाशक्ता भवतीत्यर्थ ।।६३½।।

भावबोधिनी – आफ्नो दुर्भाग्यले गर्दा व्यालयोगमा विवाह गरिएकी कन्या सर्पिणी जस्ती हुन्छिन् । हिंसामा प्रवृत्त, दरिद्र रोगी र एउटा पुरुष भनेर नबस्ने पुंश्चली हुन्छिन् ।।६३½।।

पातालयोगस्यफलमाहः--

पातालनामनि गता पाणिग्रहणे च पञ्चमान्मासात् ।।६४।।
सा प्राप्यदोषमतुलं परः प्राणान् परित्यजति ।।६४½।।

पातालनामनि रसातलाख्ये कन्या पाणिग्रहं विवाहं गता प्राप्ता च पञ्चमात् मासात् 'परः अनन्तरं' मृयते ।।६४½।।

भावबोधिनी-पातालनामक योगमा विवाह गरिएकी कन्या धेरै दुर्गुणले परिपूर्ण भएर विवाह गरेको पाँच महिना पछि यस लोकलाई छोडेर परलोकको बाटो लाग्दछिन् ।।६४½।।

क्षयस्यफलमाहः--

क्षयमासाद्योद्वाहं कन्या पक्षद्वयात् पतिहत्वा ।।६५।।
नीचे नतु सहभर्त्रा क्षपयति जाराग्निना गोत्रम् ।।६५½।।

क्षये क्षयाख्ये योगे कन्या कुमारी उद्वाहं पाणिग्रहणमासाद्य प्राप्य पक्षद्वयात्मासादनन्तरं पतिं भर्तारं हित्वा त्यक्त्वाऽन्येन नीचेन पत्यासह सार्द्धं जाराग्निना, जाराएव अग्नेः तेन जाराग्निना असतीत्येन गोत्रं कुलं क्षपति नाशयति अथवा जाराग्निना नृपेण हुतवहेन च गोत्रं क्षपयति ।।६५½।।

भावबोधिनी–क्षय योगमा विवाह गरिएकी कन्या विवाह गरेको एक महीना पछि आपना पतिलाई त्यागेर नीच जातसँग द्वितीय बिवाह गर्दछिन् । आफ्नो पवित्र गोत्रलाई जाररूपि आगोले डढाउँदछिन् ।।६५½।।

अथ तमसः फलमाहः–

पाणिग्रह स्तमसि चेल्लक्षण गुणवित्ततोऽपि सम्पन्ना ।।६६।।
सप्तति रात्रात् क्षपयति यद्यपि जाता सुरेन्द्रेण ।।६६½।।

चेच्छब्दो यद्यर्थे यदि तमसि तमः संज्ञयोगे पाणिग्रहो विवाहो भवति, तदा लक्षणे "स्निग्धान्नता गतानताम्र नखौकुमार्या" इत्यादि कन्यालक्षणोक्तेन गुणेन यद्यपि वा दाक्षिण्येन सवित्तेन धनेन च संपन्ना संयुक्ताऽपि तत्सर्वं सप्ततिरात्रात् मासद्वयाद्दिनदशक संयुक्तं क्षपयति नाशयति । तदिति कर्मणानिर्देशाल्लक्षणादिकमेव सर्वं गृह्यते् । लक्षणादिकं सर्वं बिफलं भवतीत्यर्थः । यद्यपि जाता सुरेन्द्रेण देव प्रभुणा, इन्द्रेण यद्यपि जाता तथापि क्षपयति सुरेन्द्रेणेत्यतिशय प्रतिपादनम् ।।६६ ½।।

भावबोधिनी–तमयोगमा विवाह गरिएकी कन्यामा नारी जातीमा हुनुपर्ने सब गुणले सम्पन्न भएकी र दयादाक्षिण्यादि गुणले संपन्न भएकी छन् र धन–सम्पत्तिको कमि नभएकी अर्थात् इन्द्रकी छोरी भएता पनि दुई महीना दशदिन पछि द्वितीय पतिवरण गरेर कुलघातिनी हुन्छिन् ।।६६½।।

अथ कृतान्तयोगस्य फलमाहः–

यदि खलुकृतान्तयोगे परिणयमायाति कन्यका दैवात् ।।६७।।
सा श्वसुरबन्धुवर्गं क्षपयत्यचिरेण कालेन ।।६७½।।

खल्वयं निपातो वाक्यालङ्कारो आगम द्योतनार्थम् । यदि कन्यका कुमारी दैवात् कर्मवशात् कृतान्तयोगे परिणयनं विवाहमाप्नोति तदा श्वसुरं बन्धुवर्गं क्षपयति । श्वसुरश्च बन्धुवर्गश्च श्वसुर बन्धुवर्गं, श्वसुरं भर्तुः पितरं बन्धुबर्गं वा क्षपयति अचिरेण कतिपयेन दिवसेन कालेन समयेनेति, एवं योगाः, व्याख्याता ।।६७½।।

भावबोधिनी–यदि निश्चय नै कन्याको विवाह दुर्दैव वस कृतान्त योगमा भएको छ भने, विवाह भएको अल्पसमयमा नै श्वसुराको मृत्यु हुन्छ । त्यस्तै अन्य बन्धुवर्गको पनि मृत्यु हुन्छ ।।६७½।।

अधुना विवाहे लग्नानां विशेषमाहः–

आत्मोपेक्षकपोषक वधका इति राशयोऽर्थतोऽभिहितः ।।६८।।
एभ्यः शुभमशुभं वा निर्देश्या जन्मलग्नाभ्याम् ।।६८½।।

आत्मा उपेक्षकः पोषकः वधकः एते आत्मोपेक्षकपोषकवधका श्चत्वारो राशयः सर्वतो नामतः अभिहिता उक्ताः नामतुल्यफलाः संज्ञासदृशफलं कुर्वन्तीत्यर्थः । एतदुक्तं भवति आत्मा संज्ञकेन लग्नेनोढा कन्याऽऽत्मसमा प्राणाधिका प्रियाभवति । उपेक्षकेनोपेक्षते, त्यज्यते, पोषकेन पोष्यते परिपाल्यते बधकेन वध्यते मृत इत्यर्थः । एभ्यः आत्मादिभ्यः शुभमशुभं वा सदसत् फलं जन्मलग्नाभ्यां निर्देश्यं वक्तव्यम् । जन्मं च लग्नं च जन्मलग्ने ताभ्यां जन्मतश्चन्द्रराशेर्लग्नाज्जातक लग्नाच्च तदारभ्य आत्मादिभ्यः शुभमशुभं फलं वक्तव्यमिति ।।६८½।।

भावबोधिनी– राशिहरु चार प्रकारका मानिएका छन्, जस्तै– आत्मा उपेक्षक पोषक वधक उपर्युक्त चारराशिहरुलाई यिनै नामले बोलाइन्छन् । उपर्युक्त राशिहरुको फल नामतुल्यै मानेको छ । आत्मा संज्ञाका लग्नमा बिवाह गरेर ल्याइएकी कन्या पतिकी प्राणबल्लभा हुन्छिन् । उपेक्षक नाम भएका लग्नमा विवाह गरिएकी कन्यालाई पतिले परित्याग गर्दछन् । पोषक संज्ञा भएका लग्नमा विवाह गरिएकी कन्यालाई पतिले सम्मानसाथ राख्दछन्, र उनीले समाजमा आदर भाउ पाउँदछिन् । बधक नामका लग्नमा विवाह गरिएकी कन्यालाई चाँडै नै पतिको वियोग सहनु पर्दछ । अथवा स्वयं मर्दछिन् । उपर्युक्त लग्नको फल जन्मलग्न र जन्मराशिबाट शुभ अशुभ विचार गरेर मात्र फलादेश गर्नु अन्यथा दैवज्ञ दोषी मानिने छ ।।६८½।।

एतदेव प्रपञ्चेनाह:--

आत्मेति जन्मलग्नं पञ्चम नवमं च कीर्तितं तस्मात् ।।६९।।
द्विषट्कदशम भवनमुपेक्षकाख्यं विनिर्दिष्टम् ।।
दुश्चिक्यं जामित्रं चैकादशकं च पोषकं ज्ञेयम् ।।७०।।
द्वादशनिधन चतुर्थं वधकाख्यं शास्त्रनिर्दिष्टम् ।।७०½ ।।

आत्मेति जन्मलग्नमिति येनलग्नेन जात स्तज्जन्मलग्नम तस्मादेव यत्पञ्चमं, नवमं च एतल्लग्नत्रयं आत्मसंज्ञम् ज्ञातव्यम् । एवं जन्मराशेरपि केचिल्लग्न शब्दमुभयलिङ्गमिच्छन्ति । तस्मादेव राशेर्जन्मलग्नाद्वा द्वितीय षट्दशम भवन मुपेक्षकाख्यमुपेक्षक सञ्ज्ञं निर्दिष्टम् । ताभ्यामेव दुश्चिक्यं तृतीयं जामित्रं सप्तममेकादशञ्चराशिमेतत् पोषक संज्ञंज्ञेयम् । ताभ्यामेवद्वादश निधनमष्टम चतुर्थं चैतल्लग्नत्रयंवधाख्यं वधसंज्ञकमिति शास्त्रे निर्दिष्ट कथितम् । एतद्यथा संभवं जन्मलग्नाज्जन्मराशेश्चवागमनीयम । अत्रकेचिच्चतुर्थद्वादशलग्नं गुणाधिकत्वादिच्छन्ति ।

तथा च देवलः--

चतुर्थद्वादशे कार्ये लग्ने यदि गुणाधिके ।
अष्टमं तु नकर्तव्यं यदि सर्व गुणान्वित इति ।।७०½ ।।

भावबोधिनी– जन्मलग्न त्यसदेखि पञ्चम र नवम उपर्युक्त तीन स्थानलाई आत्मा भन्दछन् । जन्मलग्न देखि द्वितीय, षष्ठ, दशमस्थानलाई उपेक्षक भन्दछन् । जन्मलग्नदेखि तृतीय सप्तम एकादशलाई पोषक भन्दछन् । जन्मलग्न देखि चतुर्थ, अष्टम र द्वादश स्थानलाई बधक भन्दछन् ।।७०½।।

जस्तै–

आत्मा = लग्न, पञ्चम नवम ॥
उपेक्षक = द्वितीय षष्ठ दशम ॥
पोषक = तृतीय सप्तम एकादश ॥
बध = चतुर्थ अष्टम द्वादश ॥७०॥

हित्वाशशाङ्कमित्यादिना परमतं लग्नोपहासेन दूषयतिः–

हित्वाशशाङ्कं यदि सप्तसौम्यैः पञ्चाशुभैः किं कथिता न सप्ता ॥७१॥
द्वित्यादि योगान् परिहृत्य कस्मान् नोक्तंशतंत्रिघनं बिलग्ने ॥७१½॥

पूर्वोक्तम्–

अनधिकृतः शुभकृत्स्यादेतैश्चन्द्रोऽन्यथाऽधिकृतः ॥
तस्माद्विवाह समये न केनचित्सङ्गतःशशी धन्यः ॥

एवं शशाङ्कः चन्द्रमसं हित्वा त्यक्त्वा यदि सौम्यैर्बुधजीवशुक्रैः परस्परं त्रिभिर्ग्रहैः सप्तयोगानन्दादयः कथिता उक्ता तथा अशुभैः पापग्रहैः पञ्चयोगा व्यालादयःकथिता । किमेतत् प्रश्ने कस्मात्सप्तैव नन्दादयो नकथिता, यतस्ते- शुभफलत्वाल्लोकेऽनुष्ठियन्ते । व्यालादयो निःप्रयोजनत्वात् किंकथमुक्ता । अथवा यथा त्रिभिः सौम्यैः सप्तयोगा संभवन्ति तयान्यास्त्रिभिरपि सप्तैव भवन्ति ते च कस्मान्नोक्ता इत्यव्याप्ति प्रदर्शन चोद्यममेतत् । अथवा निष्प्रयोजन योगाः प्रदर्श्यन्ते । तदाद्वित्र्यादियोगान् परिगृह्यद्वाभ्यां लग्नगताभ्यां ग्रहाभ्यां त्रिभिर्वाऽऽदिग्रहणा–च्चतुर्भिः पञ्चभिः षड्भिः सप्तभिर्वालग्नगतैः परिसमन्ताद्योगेनगृह्य गृहीत्वा विलग्नप्राग्लग्नस्थितैः कस्माद्धेतोःस्त्रिघनं शतं सप्तविंश- त्यधिकं शतं योगानां भवन्ति । तत्किमर्थंनोक्तं नकथितमिति । एतदुक्तं भवति, पूर्वाचार्यैः प्रसिद्धलक्षणं लक्षिता योगाःते प्रतिपाद्यन्ते । प्रकारगणनं पुनर्निष्फलमेवेत्यर्थः ॥

अथात्र विकल्प गणितं लोष्टक प्रस्तार विधाने च प्रदर्श्यंतेः–

आचार्येणैवोक्तम्–

पूर्वेण गतेन युक्तं स्थानं विनान्त्यं प्रवदन्ति संख्या ।
इच्छाविकल्पैः क्रमशोभिनीयं नोतेनिवृत्तिःपुनरन्यनीतीति ॥

एतद् व्याख्यायते यावत्संख्या ग्रहाणां विकल्पः क्रियते तावत्संख्यमङ्कमेकादिक्रमेणोच्चगतं स्थाप्यम् । तद्यथाऽत्र सप्तभिर्ग्रहैर्विकल्पः तत्र च न्यासः तत्र पूर्वश्चासौ गतश्चासौ तेन पूर्वेणगतेन सञ्ज्ञकेन स्वोच्चस्थमङ्कं युक्तः कार्यमन्त्यस्थानं विना अन्त्ये भवोऽन्त्यः तं स्थानं विनावर्जयित्वेत्यर्थः । एवमेक वार कृत्वा ततः पुनरपि पूर्वेण गतेन युक्तं स्थानं विनाऽन्त्यं । एवं भूयो भूयस्तावत्कार्यं यावत् एकाधस्यावङ्कादूर्ध्वस्थमङ्कमिति । एवं संख्या गणनां प्रवदन्ति कथयन्ति । अङ्कात्प्रभृत्योद्वित्रि चतुःपञ्च षदसप्त विकल्पयोगा उत्पद्यन्तइति । एवं सर्वत्र विकल्प गणितं कार्यम् ।

७	अत्र च सङ्कलने कृते राशिन्यासः, एवमेक विक-	७
६	ल्पः सप्तः द्विविकल्पा एकविंशति त्रिविकल्पाः	२१
५	पञ्च त्रिंशत् चतुर्विकल्पा पञ्चत्रिंशत् पञ्चविकल्पा	३५
४	एकविंशति षड्विकल्पा सप्तः सप्तविकल्पा एकम् ।	३५
३	एवं एकत्र सप्तविंशत्यधिक शतम् । एतेषां	२१
२	लोष्टक प्रस्तारेण विभागा दर्शनीया । 'इच्छा	७
१	विकल्पैः क्रमशोऽभिनीयं नीतेनिवृत्तिः पुनरन्यरीति	१

अथ" इच्छासंख्यानां विकल्पनीयानां नामाऽऽद्यक्षराणि लिखेत । तत्र तद्विकल्पे चैकैकं लोष्टचिह्नितं कृत्वा द्वितीयंच लोष्ठ चिह्नितंन्यसेत् । एवं त्र्यादिषु विकल्पेषु– आद्यास्थिर लोष्ट चिह्नितं कृत्वा तै श्चरलोष्ट चिह्नितैः सह न्यसेत् एवं कृत्वा प्रथम लोष्टकस्या पासनं कार्यम् । नीतेनिवृत्तिरिति वचनात् । ततः परंस्थिरलोष्ट चिह्नितं कृत्वाऽन्यैश्चरलोष्ट चिह्नितैः सहन्यसेत् । पुनरन्यरीतिरिति वचनात् । एवं सर्वैः सहकार्यमिति ।

तदेक विकल्पः

रविः चन्द्रः भौमः बुधः जीवः शुक्रः सौरः ।
एवं एक विकल्पः सप्तः ७

अथ द्विविकल्पाः

रविचन्द्रौ, रविभौमौ, रविबुधौ, रविजीवौ
रविशुक्रौ, रविसौरौ एवंषट् ६
चन्द्रभौमौ, चन्द्रबुधौ चन्द्र जीवौ, चन्द्रशुक्रौ
चन्द्रसौरौ, एवं पञ्च ५
भौमबुधौ, भौमजीवौ, भौमशुक्रौ, भौमसौरौ
एवं चतु० ४
बुधजीवौ, बुधशुक्रौ, बुधसौरौएवं
त्रयः ३
जीवशुक्रौ, जीवसौरौ एवं द्वौ २
शुक्रसौरौ एकमेव

२१

त्रि विकल्पाः

रविचन्द्रभौमाः, रविचन्द्रबुधाः रविचन्द्रजीवाः,
रविचन्द्र शुक्राः रविचन्द्र सौराः एवं पञ्च ५
रविभौमबुधाः रविभौवजीवाः रविभौम-
शुक्राः रविभौमसौराः एवं चतुः ४
रविबुधजीवाः, रविबुधशुक्राः रविबुध-
सौराः एवंत्रयः ३
रविजीव शुक्रा रविजीवसौराः एवं द्वौ २
रविशुक्रसौराः एकमेव १

१५

चन्द्रभौमबुधः चन्द्रभौमजीवाः, चन्द्रभौम-
शुक्राः चन्द्रभौमसौराः एवं चतु० ४
चन्द्रबुधःजीवा, चन्द्रबुधशुक्राः चन्द्रबुध-
सौराः एवं त्रयः ३
चन्द्रजीवशुक्राः चन्द्रजीवसौराः एवं द्वौ २
चन्द्रशुक्रसौराः एकमेव १

१०

भौमबुधजीवाः भौमबुधशुक्राः' भौम-
बुधसौराः एवं त्रयः ३
भौमजीवशुक्राः भौम शुक्रसौराः एवं द्वौ । २
भौमशुक्रसौराः एकमेव १
बुधजीवशुक्राः बुधजीवसौराः एवं द्वौ २
बुधशुक्रसौराः एकमेव १
६
जीवशुक्रसौराः एक मेव १
३५

चतुर्विकल्पाः

रविचन्द्रभौमबुधाः रविचन्द्रभौमजीवाः
रविचन्द्रभौम शुक्राः
रविचन्द्र भौमसौराः एवं ४ चतुः
रविचन्द्रबुधजीवाः रविचन्द्रबुध शुक्रा
रविचन्द्रबुधसौराः एवं त्रयः ३
रविचन्द्रजीवशुक्राः, रविचन्द्रशुक्रसौराः
एवं द्वौ २
रविचन्द्रशुक्रसौराः एकमेव १
१०
रविभौमबुधजीवाः रविभौमबुधशुक्राः
रविभौमबुधसौराः एवं त्रयः ३
रविभौमजीवशुक्रा रविभौमजीव सौराः
एवं द्वौ २
रविभौमशुक्रसौराः एकमेव १
६
रविबुधजीवशुक्राः, रविबुधजीव सौराः
एवं द्वौ २
रविबुधशुक्रसौराः एकमेव १

रविजीवशुक्रसौरा एकमेव १
२०

चन्द्रभौमबुधजीवाः, चन्द्रभौम--
बुधशुक्राः, चन्द्रभौमबुधसौराः एवं त्रयः ३
चन्द्रभौमजीवशुक्राः, चन्द्रभौमजीवसौराः
एवं द्वौ २
चन्द्रभौमशुक्रसौरा एकमेव १
चन्द्रबुधजीवशुक्राः, चन्द्रबुधःजीवसौराः
एवं द्वौ. २
चन्द्रबुध शुक्रसौराः एकमेव १
चन्द्रजीवशुक्रसौराः एकमेव १
१०
भौमबुधजीवशुक्राः भौमबुधजीवसौराः
एवं द्वौ २
भौमबुधशुक्रसौराः एकमेव १
भौमजीवशुक्रसौराः एकमेव १
बुधजीवशुक्रसौराः एकमेव
३५

पञ्चविकल्पाः

रविचन्द्रभौमबुधजीवाः, रविचन्द्रभौमबुध-
शुक्राः रविचन्द्रभौमबुधसौराः एवं त्रयः ३
रविचन्द्रबुधजीवशुक्राः रविचन्द्रबुधजीवसौराः
एवं द्वौ २
रविचन्द्रभौमशुक्रसौराः एकमेवच १
रविचन्द्रबुधजीवशुक्राः, रविचन्द्रबुधजीव-
सौराः एवं द्वौ २
रविचन्द्र बुधशुक्र सौरा एकमेल १
रविभौमबुधजीवशुक्राः एकमेव १

रविभौमबुधशुक्र सौराः एवं द्वौ २
रविबुधजीव शुक्रसौराः एकमेव १
रविचन्द्र भौमजीवशुक्राः, रविचन्द्र भौमजीव-
सौराः एवं द्वौ २
रविचन्द्र भौमशुक्र सौराः एकमेव १
१५

चन्द्रभौमबुधजीवशुक्राः चन्द्रभौमबुधजीव-
सौराः एवं द्वौ २
चन्द्रभौमबुधशुक्रसौराः एकमेव १
चन्द्रभौमजीवशुक्रसौराः एकमेव १
चन्द्रबुधजीवशुक्रसौराः एकमेव १
भौमबुधजीवशुक्रसौराः एकमेव १
२१

षड्विकल्पाः

रविचन्द्रभौमबुधजीवशुक्राः

रविचन्द्रभौमबुधजीवसौराः एवं द्वौ २
रविचन्द्रबुधजीवशुक्रसौराः एकमेव १
रविभौमबुधजीवशुक्रसौराः एकमेव १
रविचन्द्र भौमबुध शुक्रसौराः एकमेव १
चन्द्रभौम बुधजीव शुक्रसौराः एकमेव १
७

सप्तविकल्पाः

रविचन्द्रभौमबुध जीव शुक्रसौराः एकमेव १

७
२१
३५
३५
२१
७
१
१२७

एवं सप्तविंशति अधिक विकल्पशतं योगानां व्याख्यातमिति ।।७१½ ।।

भावबोधिनी– चन्द्रमालाई छाडेर अन्य शुभग्रह बुध बृहस्पति र शुक्रद्वारा परस्पर नन्द आदि सात योग बताइए । त्यस्तै पापग्रहहरुबाट पनि व्याल आदि पाँच योग बताइए । किन सात नन्द आदि योग मात्र नवताएर व्याल आदि योग वताएको हो । नन्दादि शुभ योगमा मङ्गलकर्म गरिने हुनाले उपर्युक्त शुभयोगको उल्लेख भयो त्यो ठीकै छ । व्यालादि अशुभयोगमा त कुनै पनि शुभकर्म गरिदैन विनाप्रयोजन उपर्युक्त अशुभयोग किन लेखिए ? ती शुभग्रहबाट सात शुभयोग हुन्छन् भने तीन पापग्रहबाट पनि व्यालादि सातैयोग हुन पर्नेमा किन लेखिएन । नलेख्नाको कारण अव्याप्ति देखाउने उद्योगहो । विना प्रयोजनका योगहरू किन देखाउने दुई, तीन, चार पाँच, छ, सात आदि लग्नमा बसेका ग्रहहरुबाट योगको प्रस्तार वनाउदा एकसय सत्ताईस योग हुन्छन् भने ती योगहरुको उल्लेख किन ? भएन । यसको कारण यो हुहुपर्दछ कि पूर्वाचार्यहरुले जतियोगहरु कार्याऽनुष्ठानमा ल्याइन्छन् त्यत्ति-मात्र उल्लेख गरे अतिरिक्त योगहरुको प्रयोजन नभएकाले उल्लेख गरेनन् ।।७१½।।

अधुनाऽपि देशाचारार्थमाह:--

देशाचार स्तापदादौ विचिन्त्यो देशे देशे यास्थिति सैव कार्या ।।७३।।
लोक द्विष्टां पण्डिता वर्जयन्ति दैवज्ञोऽपि लोक मार्गेण यायात् ।।७२½ ।।

आदौ प्रथम तावद्देशाचारो देशव्यवहारो विचिन्त्यो विचारणीयः, ततो देशे देशे प्रत्येकास्मिन् मण्डले यास्थिति यादृश्यो व्यवहारः शैव कार्याः अनुष्ठयाः यत्तो लोकद्विष्टं जनानामभिजातम् पण्डिताः शास्त्रज्ञा

वर्जयन्ति नकुर्वंते । सतोऽस्माद्विज्ञोऽपि लोकमार्गेण जनानुसारेण यायात् लोकमार्गमनुवर्तयेदित्यर्थः ।।७२½।।

भावबोधिनी-विद्वान्ले सर्व प्रथम कुनदेशमा कस्तो स्थिति, रीति-रिवाज छ त्यस विषयको ज्ञानगर्नु पर्दछ । जुनकाम गर्दा त्यस देशका जनता रुचाउदैनन् विद्वान्ले त्यस कामलाई छाडिदिन्छन् । अतः ज्योतिषीले पनि जनताले रुचाएकै बाटोबाट हिड्नु पर्दछ ।।७२½।।

अथ तमेव देशाचारमाहः-

बृहस्पतौ गोचर शोभनस्थे विवाहमिच्छन्ति च दाक्षिणात्याः ।।७३।।
रवौ शुभस्थे च वदन्ति गौडा न गोचरोमालवके प्रमाणम् ।।७३½ ।।

बृहस्पतौ गुरौ गोचराख्ये शोभनस्थे गोचराऽनुकूले स्थिते तृतीय पञ्चम नवमैकादशे कन्या कुमारयो र्जन्म-राशिभ्यां दाक्षिणात्या दक्षिणदिग् निवासीनोजना विवाहं पाणिग्रहणमिच्छन्ति, अनुमन्यन्ते ।

तथा च

जीवे गोचर शुभदे पाणिग्रहणं वदन्ति ये तेभ्यः ।
कन्याकुमारयो रपि शेषैरशुभैर्ग्रहैर्नित्यम् ।।

रवौ शुभस्थइति, रवावादित्ये गोचर शोभनस्थे तृतीयषष्ठदशमैकादशे कन्याकुमारयो र्जन्मराशिभ्यां गौडा विवाहं वदन्ति ।

तथा च

गोचर शुद्धे सूर्ये कार्यः पाणिग्रहो बरकुमार्योः ।
अन्यै रशुभकरैः सूर्यबलं शस्तमिच्छन्ति ।।

नगोचरो मालवके प्रमाणंमालव देशे गोचरो ग्रहाणां साकूलो नप्रमाणं नाभिमत मित्यर्थः । तेषां लग्नशुद्धावभिमतो विवाहमित्यर्थः ।

तथा च

लग्ने ग्रहानुकूले पापदृष्टे कलत्रगे राशौ ।
चन्द्रग्रहैं वियुक्ते पाणिग्रहणं प्रशंसन्ति ।।
तथा च देशान्तरेषु पठन्ति-
गुरुक्षेत्र गते सूर्ये सूर्यक्षेत्र गते गुरौ ।
बिवाहं न प्रशंसन्ति कन्यावै धव्यकृद्भवेदिति ।।

एतत् पूर्वदेशानुसारेण चिन्त्यमिति ।।७३½।।

भावबोधिनी–विन्ध्याचल भन्दा दक्षिणतर्फ वस्ने अर्थात् दाक्षिणात्यहरु गोचरबाट बृहस्पति तृतीय पञ्चम नवम एकादस्थानमा वसेका समयमा विवाह गर्नमा शुभ मान्दछन्। गौडहरु सूर्य गोचरबाट तृतीय षष्ठ दशम एकादश स्थानमा बसेका समयमा विवाह गर्न शुभ मान्दछन्। मालवदेशका निवासीहरु ग्रहगोचरको वास्ता गर्दैनन् र लग्नको शुद्धताको पक्षपाति छन् ।।७३½।।

अथ विवाह प्रतिषेधार्थमाहः–

हरौ प्रसुप्ते न च दक्षिणायने नचैत्रमासे न च पुष्य संज्ञिते ।।७४।।
तिथौ च रिक्ते शशिनिक्षयङ्गते रवीन्दुभौमार्कि दिनेषु चाशुभम् ।।७४½ ।।

हरौ विष्णो भगवति प्रसुप्ते आषाढ शुक्ल द्वादश्यामारभ्य कार्तिक शुक्ल द्वादशी यावत् एवं हरौ प्रसुप्ते बिवाहादिकं नकार्यम्। न चैत्र मासे चैत्रमासे विवाहं न कार्यम्, न पुष्य संज्ञिते पौष्यनक्षत्रे दक्षिणायने ग्रहणे कृते पौषमास्य निषेध प्राप्ते तत्किमिति पुनः पौषग्रहणकृतमत्रोच्यते। पौषग्रहणेनैतज्ज्ञापयति। यथा कार्तिक मार्ग शीर्षयोः पाणिग्रहणं कार्यमिति। तथा च भगवान् गर्गेण चोक्तं विवाह पटले।

तथा च गर्गः–
श्रावणे प्रौष्टपदे च पौषे चेति विगर्हितः।
आषाढे ऽथाश्विने मासि त्यजेत्पाणि ग्रहस्य च ।।
श्रावणे नित्यमुद्विग्ना प्रौष्टपादेच्च दुःखिता।
प्रीतिराश्वयुजे नास्ति पुत्रोपेताति कार्तिके ।।
धनधान्य सुतोपेता सौम्य भर्तृपरायणा।
विधवा पुत्रहीना वा पौषे मासि न संशयः ।।
माघे नियम संयुक्ता फाल्गुने तु पतिव्रता।
चैत्रे तु पतिहीना वा विदेशं चापि गच्छति ।।
वैशाखे विपुलावृद्धि ज्येष्ठे पुत्रवती सती।
आषाढे दुःखिता दीना परान्नमुपजीवती ।।

तिथौच रिक्त इति, रिक्ते तिथौ चतुर्थी नवमी चतुर्दशी सञ्ज्ञे नकार्यं। तथा शशिनी चन्द्रे क्षयं गते ऽतिक्षीणे कृष्णत्रयोदश्यामारभ्य प्रतिपदान्तं यावत्। तथा रवीन्दुभौमार्किदिनेषु सूर्य चन्द्र भौमसौर वारेषु, अशुभं नशस्तं विवाहं तस्माद्वर्जनीयमित्यर्थः ।।७४½।।

भावबोधिनी-आषाढ शुक्ल द्वादशी देखी कार्तिक शुल्क द्वादशी पर्यन्त अर्थात् चतुर्मास भर विवाह गर्न हुदैन। दक्षिणायन अर्थात् श्रावण एकगतेदेखि पौषमसान्त सम्म, त्यस्तै चैत्र महिना र पुषमा पनि विवाह गर्न हुदैन। रिक्तातिथि चतुर्थी नवमी र चतुर्दशीका दिन विवाह गर्न हुदैन। कृष्णपक्षको त्रयोदशी देखि प्रतिपदासम्म विवाह गर्न हुदैन। आदित्यवार मङ्गलवार र शनिश्चरवार पनि विवाह गर्न हुदैन ।।७४½।।

अथ व्यतिपातदूषणमाहः-

व्यतिपातहतं दिनत्रयं व्यतिपातेन समं च वैधृतिम् ।।७५।।
तदपि स्फुट पात दर्शने द्विगुणं यदि वा न निश्चितम् ।।७५½।।

व्यतिपातं दिनत्रयं, व्यतिपात युक्तेन नक्षत्रेण एष्यं वर्तमानमतिक्रान्तं च दिनत्रयं हतं दुष्टमकर्मण्यं भवति । व्यतिपातेन च समं वैधृतिम्, व्यतिपाते लाटाख्यः वैधृतिं च व्यतिपाततुल्यं दिनत्रयमपि दूषयन्तीत्यर्थः । तदपि स्फुट-पात दर्शन इति एतदपि स्फुटपात दर्शने क्रान्तिसाम्याद्यदि स्फुटगणितेन पातो दृष्टस्तदेवं व्यतिपातं दिनत्रयं द्विगुणं यदि वा न निश्चितम् । स्फुटपात दर्शने क्रान्तिसाम्याद्यदि न निश्चितम् ।, स्फुटगणितेन वाऽत्विष्टं तदा द्विगुणं व्यतिपात हतं एष्यद्दिनत्रयमतीतं दिनत्रयं तदहश्चेति दिन सप्तकमकर्मण्यं भवति ।

आचार्येण यात्रायामुक्तम्-

एष्यो धनं क्षपयति व्यतिपात योगो
मृत्युं ददाति न चिरादथ वर्तमानम् ।
सन्ताप शोकगद विघ्नभयान्यतीतं
तस्माद्दिनत्रयमपि प्रजहीत विद्वान् ।।
अतीतमेष्यं तदधश्च केचिद्दिनत्रयं दूषयतीति शास्त्रम् ।।
न संहिता हौरिकता त्रिकालं एवं प्रकारो व्यतिपातयोगः ।।७५½।।

भावबोधिनी-व्यतिपातले युक्त भएको दिन र त्यस भन्दा अघिल्लो तथा पछिल्लो दिन जम्मा तीन दिन सम्म कुनै पनि शुभकार्य गर्न हुँदैन । त्यस्तै वैधृतियोग परेको छ भने पनि तीन दिन शुभकार्य गर्न हुँदैन । यदि गणितद्वारा स्पष्ट व्यतिपात देखियो भने त दुई गुना अर्थात् वितेका तीन दिन आगामी तीन दिन र वर्तमान दिन एक गरेर जम्मा सात दिन सम्म शुभकार्य गर्न हुँदैन । क्रान्ति साम्यबाट देखिने र गणितबाट निश्चय हुन नसके पनि सात दिन सम्म शुभकार्य गर्न निषेध गरिएको छ ।।७५½।।

पुनरपिव्यतिपात लक्षणमाहः--

व्यतिपात व्याघातः षष्ठे दशमे च वैधृतं धिष्ण्ये ।।७६।।
विक्षोभणगण्डान्तावलिधृतिसंख्ये च व्याघातः ।।७६½।।

व्यतिपात विशेषस्य सञ्ज्ञा, यस्मिन्नृक्षे व्यतिपात स्तस्मादग्रतः षष्ठे नक्षत्रे व्याघातो भवति, एवं व्यतिपाता-द्दशमे धिष्ण्ये नक्षत्रे वैधृतं भवति तथा व्यतिपाता द्विक्षोभणाख्ये यानातिधृतिसंख्ये एकोनविंशे नक्षत्रे भवति । व्यतिपातादेव गण्डान्ते विंशे विंशति संख्ये नक्षत्रे भवति ।।७६½।।

भावबोधिनी- व्यतिपात विशेषनाम, जुन नक्षत्रमा व्यतिपात योग हुन्छ त्यसभन्दा अगाडीको छैटौं नक्षत्रमा व्याघात योग हुन्छ, त्यस्तै व्यतिपात योगभन्दा अगाडीको दशौं नक्षत्रमा वैधृति योग हुन्छ, व्यतिपात भन्दा अगाडी उन्नाइसौं नक्षत्रमा विक्षोभण योग पर्दछ, व्यपिपात भन्दा अगाडी बिसौं नक्षत्रमा गण्डान्त योग पर्दछ ।।७६½।।

अस्य व्यतिपातस्य कस्यचिद्देशवशेन दूषणमाहः--

तदिदं व्यतिपातञ्च कथयन्ति उत्तरदिक्स्थिताजनाः ।।७७।।
व्यतिपात वदाकुलस्थितं बहुसिद्धान्त विशेष कारणे ।।७७½।।

इदं तदनन्तरोक्तं व्याघात पञ्चकं व्यतिपात वैधृतं व्याघात विक्षोभण गण्डान्त सञ्ज्ञमुत्तरदिक्स्थिता जनाः द्विगुणं यदि वा ननिश्चितमित्युक्तं कथं ननिश्चीयत इत्याह । व्यतिपातवदाकुलस्थितं, एतद् व्यतिपात पञ्चकं व्यतिपात वद् व्यतिपाततुल्य माकुलमनिश्चयी कृतस्थितं, यथा व्यतिपात दिनत्रयं दूषयति तथा सर्व एवेति । एक हेतुना बहुसिद्धान्त विभेदकारणैः यतो बहूनां सर्वेषां पञ्चानामपि सिद्धान्तानां परस्परं भेदोऽसादृश्यं तत्कारणेन व्याकुलम् । एकस्मिन् सिद्धान्ते वर्तमान मन्यस्मिन्नागामीत्यादि कारणै रिति ।।७७½।।

भावबोधिनी– उपर्युक्तं व्यतिपात वैधृति व्याघात विक्षोभण गण्डान्त नामका पाँच योगहरुलाई उत्तरदेशका वासिन्दाहरु व्यतिपात बराबर अशुभ मान्दछन् । किन कि धेरै सिद्धान्तहरुमा मत भिन्नता भएको हुनाले व्यतिपात-योग जन्य दोष तीन दिन मान्ने भएकोले उपर्युक्त अन्य चार योग जन्य दोष पनि तीनै दिन वार्नु पर्दछ । किनभने पाँचै सिद्धान्तको एक मत नभएकाले नै उत्तरदेशका वासिन्दाले अनिश्चित स्थितिमा यस्तो निर्णय गरेका हुन् ।।७७½।।

अन्यच्चाहः--

तथोत्तराः साकल सन्निकृष्टा माण्डव्य मातीयतु सार्द्धकेषु ।।७८।।
खशेषुहूणेषु नबाह्लिकेषु वा' न, काण देशेषु नगोप भोजाः ।।७८½।।
अनार्षोऽयंश्लोकः । स्पष्टार्थः ।।७८½।।

भावबोधिनी– यो श्लोक आर्ष हैन र अर्थ स्पष्ट छ ।।७८½।।

अथोक्त शेषमाहः--

एकादशोक्तानि शुभानि भानि शेषाण्यनिष्टानि विवाहकाले ।।७९।।
तत्राग्नि तारा शशिवीर्ययुक्ता त्रिशन्मुहूर्ताश्च विचिन्तनीयाः ।।७९½।।

एकादशभानि नक्षत्राणि मृशिरसि मघा हस्तमैत्रोत्तरासु श्वसन, निऋति पूषाधातृदेवेष्विति एतानि विवाहे पाणिग्रहणे शुभानि प्रशस्तानि । तत्रापि तस्मिन्नपि वैवाहिके नक्षत्रे त्रिंशन्मुहूर्ताः शिवादिका स्तारा शशिवीर्य युक्ता त्रिशन्मुहूर्ताश्च विचिन्तनीयाः । एतदुक्तं भवतीति, विवाहकर्क्षेऽपि विवाहे मुहूर्ता चन्द्रताराऽनुकूलो ग्राह्य इति ।।७९½।।

भावबोधिनी– मृगशिरा मघा हस्त अनुराधा तीन उत्तरा श्वसन निऋति पूषा रोहिणी उपर्युक्त एघार नक्षत्रलाई विवाहमा लिइएका छन् । यी बाहेक अन्य नक्षत्र विवाहका निमित्त अशुभ मानेको छ । उपर्युक्त विवाह नक्षत्रमा शिवा आदि तारा चन्द्रमाका बलले युक्त छन् छैनन् भन्ने कुरो पनि विचार गर्नु पर्दछ । विवाहका निमित्त शुभ मानिएका नक्षत्रमा पनि चन्द्रतारा अनुकूल हुनु पर्दछ ।।७९½।।

पुनरप्याहः-

तुलाधरस्त्रीमिथुना द्विवाह लग्ने स्थिता पाप फला नचान्ये ।।८०।।
त्रिशांशकद्वादश भागभेदै द्रेष्काण होरा प्रमुखै विचिन्त्यः ।।८०½।।

तुलाधर स्तुलः स्त्री कन्या मिथुनं प्रसिद्धमेव एतान् विहाय वर्जयित्वा अन्ये च राशयो लग्नेस्थिता पापफला भवन्ति । त्रिशांशक द्वादशांकभागभेदै रिति त्रिशांशको द्वादशभागः प्रसिद्धः, द्रेष्काणं राशि त्रिभागं होरा राश्यर्द्धम् । एता एव भेदा एतेषु चानिष्ट फलेषु राशिषु तुलाधर स्त्री मिथुन द्रेष्काण नवांशक द्वादशभाग विचिन्त्यश्चिन्तनीयाः, होराप्रमुखैः, होरात्रिशांशकःशुभश्चिन्तनीयः । एत दुक्तं भवति विवाहे होरा द्रेष्काण नवांशद्वादश भाग त्रिशांश भाग वैवाहिकाः शुभ ग्रहाणां च सम्बन्धिनी चिन्तनीया इति ।।८०½।।

भावबोधिनी– मिथुन, कन्या तुलो उपर्युक्त राशिहरु विवाहमा शुभ मानिएका छन् । उपर्युक्त तीन राशि बाहेक अन्य राशिहरु अशुभ फल दिने हुन् भन्ने लेखिएको छ । त्रिशांश द्वादशांश द्रेष्काण होरा इत्यादि अशुभ राशि लग्नभएमा उपर्युक्त मिथुन कन्या तुलो यी राशिका त्रिशांश द्वादशांश, नवांश द्रेष्काण होरा आदिको विचार गरेर मात्र विवाहमा लिइने होरा द्रेष्काण नवांश द्वादशांश त्रिशांश शुभग्रहका नै लिनु पर्दछ ।।८०½।।

अथ परमतेन विष्टेर्दूषणमाहः-

मासे नाष्टौ विष्टिदुष्टानि भानि तत्राप्येके रात्रिमाहु र्दिनञ्च ।।८१।।
तिथ्यर्द्धेऽन्त्ये प्राप्तिनाशौ च विष्टे चान्द्रमानं विष्टिहेतु नशेषम् ।।८१½।।

मासेन त्रिशरात्रे विष्टिदुष्टानि विष्टिकरणेन दूषितानि अष्टावहानि दिनानि भवन्ति । कृष्णपक्षे तृतीयायां सप्तमी दशमी चतुर्दशी चेति दिनचतुष्टयम् । तथा शुक्लपक्षे चतुर्थ्यष्टम्यैकादशी पूर्णमासी चेति दिन चतुष्टयमेव-मष्टौ दिनानि मासेन विष्टिदुष्टानि । तत्रापि तेषु दिनेषु नक्तं रात्रि र्दिनं च दिवसं अहोरात्रं दुष्टमित्येके, आहुः कथयन्ति ।

तथा च

दत्वा याऽसितपक्षेतु दिनान्येवं सितेऽपिवा ।
विष्टिदुष्टान्यहान्याहु स्तत्र कर्म विगर्हितमिति ।।

एतदेव विशेष्य स्वमतं दर्शयति । तिथ्यर्द्धेन प्राप्तिनाशौच विष्टे, यतः तिथ्यर्द्धेऽन्त्ये पश्चिमेऽर्द्धे विष्टेः प्राप्ति नाशौ प्रतिऋक्षयोर्भवति । तथा हि कृष्णक्षे तृतीयायां अन्त्यर्द्धे प्राप्तिः तत्रैव सप्तम्यामन्त्यर्द्धे नाशः तत्रैव दशम्यामन्त्येऽर्द्धे प्राप्तिश्चतुर्दश्यामन्त्येऽर्द्धेनाशः । तथा शुक्लपक्षे चतुर्थ्यामन्त्येऽर्धे वै प्राप्तिः, तत्रैवाष्टम्यामन्त्येऽर्द्धे वैनाशः, तत्रैवैकादश्यामन्त्येऽर्द्धे प्राप्तिः, तत्रैवाष्टम्यामन्त्येऽर्द्धे वै नाशः, तत्रैवैकादश्यामन्त्येऽर्द्धे प्राप्तिः तत्रैव पौर्णमा-स्यामन्त्येऽर्द्धेनाशः । यत श्चान्द्रमानं विष्टिहेतुः तिथिश्चान्द्रमानं यदुक्तं तिथिः शशाङ्क दिन मिति । न शेषं मानं सौर सावन नाक्षत्रम् । एतदुक्तं भवति, यावत्य घटिका तिथिभोगो भवति तदर्द्धे परिकल्पय्य, विष्टेः प्राप्तिनाशौ बोद्धव्याविति ।

रात्रे श्च बिष्टिः कृष्णतृतीयायां दशम्यां च परेदले ।
प्रागेव सप्तमी भूते शुक्लपक्षे तद्वत्परेतिथाविति ।।८१½।।

भावबोधिनी– एकमहीना अर्थात् तीस अहोरात्रमा आठअहोरात्रलाई विष्टिकरणले दूषित गर्दछ । जस्तै कृष्णपक्षमा तृतीया सप्तमी दशमी र चतुर्दशी त्यस्तै शुक्लपक्षमा चतुर्थी अष्टमी एकादशी तथा पूर्णिमा तिथिहरु विष्टिकरणद्वारा दूषित हुन्छन् भन्ने कुनै कुनै आचार्यको भनाइछ । वराहमिहिराचार्यको मत निम्नलिखित छ, कृष्णपक्षको तृतीया तिथिको पछिल्लो भागमा प्राप्ति हुन्छ, सप्तमीको पछिल्लोभागमा नाशहुन्छ । दशमीको पछिल्लो भागमा प्राप्ति र चतुर्दशीको पछिल्लो भागमा नाश हुन्छ । शुक्लपक्षको चतुर्थितिथिको पछिल्लो भागमा प्राप्ति अष्टमीको पछिल्लो भागमा नाश एकादशीको पछिल्लो भागमा प्राप्ति र पूर्णिमागो पछिल्लो भागमा नाश हुन्छ भन्ने छ । विष्टिको कारण चन्द्रमासनै हो किन कि तिथिलाई शशाङ्क दिन भन्दछन् । सौर सावन तथा नाक्षत्र मास हैन । तिथिले भोगगर्ने घडी कति छ त्यस्लाई आधा गरेर विष्टिकरणबाट हुने प्राप्तिर नाश बुझ्नु पर्दछ ॥१½॥

इदानीं गोधूलीकालस्य प्रशंसार्थमाहः–

प्राच्याः प्रायोः न्यूनवर्णाः सगोपाः संध्याकालं प्राहुरिष्टं न शेषम् ॥८२॥
यावचछान्तं गोरजोनाभ्युपेति तावत्तेषां चित्त शुद्धिर्विवाहे ॥८२½॥

प्राच्याः पूर्वदेशभवाः प्रायो ग्रहणबाहुल्यार्थं न्यूनवर्णाः कृष्णजातयः स गोपाः वनवासिनो गोपालका स्ते संध्यासहितं संध्याकालमिष्टं शोभनं प्राहुः कथयन्ति न शेषं अन्यकालं शोभनंनेच्छन्ति ।

संध्यालक्षणम्–

अर्द्धास्तमितानुदितात्सूर्यादस्पष्ट भवन्नभो यावत् ।
तावत्संध्याकाल .... ॥

द्वयोरपि संध्ययोर्ग्रहणम्, गोरजो धूलि यावच्छान्तः समं नाभ्युपैति तावत्तेषां विवाहे चित्तशुद्धि र्मनः शुद्धिरिति ॥८२½॥

भावबोधिनी– पूर्वदेशका निवासीहरु मध्ये विशेष गरेर तल्लोजातका गोपालहरु संध्याकललाईनै सर्वोत्तम शुभकालहो भन्दछन् त्यस भन्दा अतिरिक्तकाललाई शुभकाल मान्दैनन् । वनबाट चरेर फर्किएका गाईका खूरबाट उठेको धूलो शान्त नभएसम्म र आकाश अस्पष्टरूपमा देखिउञ्जेल सम्मलाई संध्याकाल भनिन्छ त्यसै समय सम्मलाई उपर्युक्त जातीहरु शुद्धसमय भनेर आत्मसन्तोष गर्दछन् ॥८२½॥

अथ परसंध्यायामतिशयेन शोभनत्वमाहः–

गोपैर्यष्टया हतानां खुरपुटदलिता या तु धूलिर्दिनान्ते
सोद्वाहे सुन्दरीणां बिपुलधनसुता श्चायुरारोग्य संपत् ॥८३॥
तस्मिन् काले नचर्क्षं न च तिथिकरणं नैव लग्नं न योगः
ख्यातः पुंसां सुखार्थं शमयति दुरिता न्युत्थितं गोरजस्तु ॥८३½॥

श्रुताऽत्र मिताध्याहारे वाक्यार्थस्य परिपूर्णता जायेत यद्यप्यत्र गोग्रहणं नास्ति तथाप्यध्याह्रियते । गोपै र्गोपालकैः यष्टचा लगुडेनाऽऽहतानां घातितानां पदखुरपुटैः खुराग्रै र्दलिता खण्डिता धूली रजो दिनान्तेऽस्तमयकाले

चोद्वाहे पाणिग्रहणे सुन्दरीणां बिपुला धनसुता श्चायुरारोग्यसंपत्करोति । बिपुलं प्रभूतं धनं वित्तं सुताः पुत्राः, आयुर्जीवितं आरोग्यमरोगित्वं संपदैश्वर्यं तस्मिन्काले सन्ध्यासमये नचर्क्षं न नक्षत्रं शोभमुपयुज्येत न च तिथि-नन्दादिकः न च करणं बबादिकं नैवलग्नं वैवाहिकं मिथुन तुलानामन्यतम् न च योगो नन्दादिकः पुंसां पुरुषाणां सकालः सन्ध्यासमयः सुखार्थं सौख्याय ख्यातः उक्तः । तत्र यदुत्थितमुत्पन्नं गोरजो धूलिस्तदेव सर्वाणि दुरितानि दुःखानि शमयन्ति ॥८३½॥

भावबोधिनी–सायङ्कालमा गोठालाले गाईचराएर घरतिर ल्याउंदा गाईका खुरले कुल्चिएर धूलो उडाउंदै आउने समय (गोधूली) मा विवाह गरिएकी कन्याले ठूलो ऐश्वर्य भोग गर्दछिन् तथा निरोगी भएर नाती–नातिना आदिको सुख भोग गर्दछिन् । उपर्युक्त गोधूलीकालमा विवाहमा ग्राह्य नक्षत्र, तिथि करण आदि कुनै कुराको पनि विचार गर्नु पर्दैन । लग्न नवांश योग आदिको विचार पनि गर्नु पर्दैन । उपर्युक्त गोधूली कालमा विवाह गरिने वरबधूका निमित्त उपर्युक्त समय कल्याणकारी छ । उपर्युक्त समयमा विवाह गर्दा परिआउने विघ्न–बाधा सबै गाईका खुरबाट उठेका धूलाले नाश गर्दछन् ॥८३½॥

अथलोकव्यवहारार्थमाहः–

कुलस्य देशस्य च चित्तवृत्तिर्न खण्डनिया विदुषा कदाचित् ॥८४॥
दोषः प्रतिस्याय कृतोऽपि योऽत्र संभाव्यते ज्यौतिषिकस्य सोऽज्ञैः ॥८४½॥

कुलस्याऽऽभिजनस्य देशस्य च मध्यदेशाद्यं श्चित्तवृत्तिः स्थितिर्विदुषा पण्डितेन कदाचिदपि न खण्डनीया न चालनीया देशकुलस्यिति परिहारेण लोकवलेनैव शास्त्रेण व्यवहारं नीयत इत्यर्थः । यतः प्रतिस्यायः पीनसोरोगः तत्कृतोऽपि योऽत्र दोषः स्वल्पो प्युत्पद्यते । यतो ज्योतिषिकस्य दैवज्ञस्याऽज्ञै मूर्खै रित्युच्यते, अनुमीयते, तस्मात् कुलदेश स्यिति न परिहरणीयेत्यर्थः ॥८४½॥

भावबोधिनी – विद्वानले कुलपरंपरा रीतिस्थिति आफ्नो आफ्नो देशको रीति-रिवाजलाई परिवर्तन गरा-उन हुदैन । जस्तै सानो भए पनि पीनास रोगले अन्यान्य रोग उत्पन्न गराउदछ । त्यस्तै देश विशेषको वंशपरंपराको रीति स्थिति परिवर्तन गराउंदा उत्पन्न हुन गएको दोष भागी मूर्खहरुले ज्योतिषीलाई नै गराउंद छन् । अतः दैवज्ञ-ले सावधान भएर काम गर्नु पर्दछ ॥८४½॥

अत्रापिदाढर्यमाहः–

शास्त्रशरीरमबुध्वा बहुधा जल्पन्ति यद्यपि नानुमतम् ॥८५॥
काणानां विषयगतः प्राज्ञो निमिलयेन्नेत्रम् ॥८५½॥

शास्त्रशरीरं शास्त्रसद्भाव मबुध्या बहव, प्रभूता यद्यपि नानुमत मनभिमतं जल्पन्ति कथयन्ति, तथापि बहुनां मतमनुष्ठेयम् । अत्र दृष्टान्तमाह काणानामेकाक्षकाणां बिषये देशे गतः प्राप्तः प्राज्ञो मेधावी नेत्रमेकं चक्षु निर्मीलयेत् । अन्यथा यातो यत्नात्परिभवं प्राप्नोति ॥८५½॥

भावबोधिनी – शास्त्रको आशय नबुझेर धेरै व्यक्तिहरु आफ्नो अनुकूलको आशयव्यक्त गर्दछन्, त्यस्ता व्यक्तिहरू सँग विवाद गर्नु भन्दा बहुमतको पक्षमानतुनै वेस हुन्छ । किन भने कानाको देशमा गएका समयमा एउटा आँखो चिम्लि दिनुनै बुद्धिमान्को बुद्धिमानि हो ॥८५½॥

अथोपहासार्थमाह:-

एवं विवाहसमये गमने प्रवेशे कार्येषु मङ्गलयुतेष्वथवा परेषु ।।८६।।
दोषं कुशिक्षित कुदैव विदोवदन्ति रागेण वा पटुधियो नमोऽस्तुतेभ्यः ।।८६½।।

एवं अनेन प्रकारेण विवाहसमय पाणिग्रहण काले, गमने यात्रायां प्रवेशेषु वेश्मप्रवेशेऽथवा परेष्वन्येषु मङ्गलयुतेषु कार्येषु चूडोपनयनादिषु दोषं दुष्टतां वदन्ति कथयन्ति । कुशिक्षित कुदैव विदः, कुशिक्षितोऽज्ञाः कुत्सित शिक्षितयैं रलिक पण्डिता; कुदैव विदो मूर्ख ज्योतिषिकाः, अथवा पटुधिया पण्डिता अपि रागेण मात्सर्येण वदन्ति तेभ्यो नमोऽस्तु नमस्कारो भवतु, स्कन्धे आरोप्य पातनम् ।।८६½।।

भावबोधिनी– विवाहका समयमा यात्रामा गृहप्रवेशमा अथवा अन्यान्य मङ्गलकार्यादि जस्तै चूडाकर्म व्रतबन्ध आदि शुभकार्यहरुमा नचाँहिदो दोष देखाउँदछन्, त्यस्ता मूर्खहरु र मूर्खज्योतिषीवर्ग तथा रिसडाहा गर्ने सुयोग्य विद्वान्हरुलाई पनि मेरो नमस्कार छ ।।८६½।।

अथ विवाहे चन्द्रार्कयोर्विशेषमाह:-

गोचर शुद्धाविन्दु कन्यायाा यत्नतः शुभंवीक्ष्य ।।८७।।
तिग्मकिरण श्च पुंसः शेषै रवर्णै रपि विवाहः ।।८७½।।

कन्यायाः कुमार्या गोचरशुद्धाविन्दुः स रवि गोचरनुकूल यत्नतः शुभं वीक्ष्याऽनुकूलं विचार्यः ।

तथा च वात्स्योमुनि:-

शुभेऽब्दादपि विधिकृतो विवाहो न प्रशस्यते ।
यदा जगत्पालयता शशाङ्केन शुभप्रदः ।।
कन्यायाः शीतगु स्तस्माच्छुभं यत्नेन निर्दिशेत् ।

तथा च देवल:-

पुरुषस्य यथा सूर्यः कन्यायाः शीतदीधितिः ।
इष्टस्थान मत स्तत्र विवाहः शुभकृत्स्मृतः ।।८७½।।

भावबोधिनी– विवाहमा कन्याको गोचरबाट चन्द्रमाको शुद्धता र सूर्य पनि अनुकूल छ छैन भन्ने विचार गर्नु पर्दछ । कुमारको चाहीं गोचरबाट सूर्य शुद्ध छ छैन भन्ने विचार गर्नु पर्दछ । विशेष गरेर कन्याको चन्द्रमा र कुमारको सूर्य अनुकूल हुनु पर्दछ ।।८७½।।

अथ यथोक्तकालस्याऽर्थे विशेषमाह:-

नसकलगुणसंप ल्लभ्यतेऽल्पै रहोभि र्बहुतर गुणयोगं योजयेतमङ्गलेषु ।।८८।।
प्रभवतिनहिदोषो भूरिभावे गुणानां सलिललवइवाग्नेः संप्रदीप्तेन्धनस्य ।।८८½।।

अल्पै रहोभिरत्यल्पदिनैः सकल गुणसंपत्समस्त गुणसंपत्तिर्न लभ्यते नप्राप्यते । तस्मान्मङ्गलेषु विवाहादिषु बहुतर गुणयोगं प्रभूतगुण संयोगं योजये दद्यात् । "प्रभवति नहिदोषो भूरिभावे गुणानाम् ।" गुणानां भूरि भावे बहुले सति स्वल्पदोषो नभवति, हि यस्मादर्थे न किञ्चित्कर्तुं शक्नोति । एतदुक्तं भवति यदा गुणश्च दोषश्च सहिता भवन्ति । तदागुणानामाधिक्ये दोषा अपि अकिञ्चित्करा एव । यतो गुणानां भूरिभावे प्रभुतत्वे सति दोषोन प्रभवति । न समर्थो भवति । तथा दृष्टान्तमाह, "सलिललव इवाग्ने संप्रदीप्तेन्धनस्य ।" यथा सम्यक् प्रदीप्त काष्ठस्याग्नेः सलिलवो जलकणः समयितुं नसमर्थो भवति । गुणाधिक्ये दोषा अकिञ्चित्कराः इति तात्पर्यार्थः ।

तथा च वात्स्योमुनिः–
अब्दमासार्द्धमासांश्च तिथीन् वीक्ष्य गुणावहान् ।
सुलग्न पञ्चप्रभृतिं शुभस्थान गतान् ग्रहान् ।।
कार्योविवाहो निर्दोषः कालो यस्मात्सुदुर्लभ इति ।।८८½।।

भावबोधिनी–आफुलाई आवश्यक पर्‍यो भन्दैमा अल्पसमयमा अत्यन्त शुद्धकाल पाईदैन । त्यसो हुनाले विवाह आदि मङ्गलकार्यमा हरप्रकारबाट धेरैगुणले युक्त भएको शुद्धसमय ठम्याउन पर्दछ । त्यस्तो शुद्धसमयमा सानातिना अशुभकारियोग देखिए पनि केहि खराव गर्न शक्तैनन् । जस्तै ठूलोदाउराको राशिमा दनदन बलेको आगोलाई जलकाछिटाले निभाउन शक्तैन त्यस्तै धेरै शुभगुणले युक्त भएको समयलाई सानातिना अशुभ शकुनादिले केहि गर्न शक्तैन ।।८८½।।

दोषाधिक्ये विशेषमाहः–

गुणशतमपि दोषः कश्चिद्देकोऽपिवृद्धः क्षपयति यदिनान्यत्तद्विरोधि गुणोऽस्ति ।।८९½।।
घटमपिपरिपूर्णं पञ्चगव्यस्य शक्त्या मलिनयति सुराया बिन्दुरेकोऽपि सर्वम् ।।८९।।

कश्चिद्वैधव्यादिको दोषो वृद्धः स्थूलः । एकोऽपि गुणशतं संख्यादिकमपि क्षपयति नाशयति यदि तस्यदोषस्य विरोधी विरोधकर प्रतिघातकारी न गुणोऽस्ति नविद्यते । यथा सूर्ये द्वितीये स्वल्पधनो भोक्ता, गुरौ द्वितीये अतिधन भोक्ता, तत्र द्वयोः संभवतो विरोधिनो गुणेन दोषः नतृप्तिक्रियते । एवं स्वमत्या बिचारणीयम् । अत्र दृष्टान्तमाह, 'घटमपि परिपूर्णं पञ्चगव्यस्य शक्तेति ।' "गोमूत्रंगोमयं क्षीरं दधिसर्पिकुशोदकम् ।" इति पञ्चगव्ये, यथा पञ्चगव्यस्य घट परिपूर्णं सुराया बिन्दुरेकोऽपि शक्त्या सामर्थ्येन मलिनयति दुष्टतामापादयति सर्वम् । निरवशेषं दूषयति । अत्रापि केन विवाह उक्त स्तस्य च स्वल्पकालत्वात् विधानस्य चाऽति दीर्घत्वा त्कस्मिन् कर्मकालांशको गृहीतव्यः ।।८९½।।

भावबोधिनी– कुनै जबर्जस्त वैधव्य जस्ता भयङ्करयौटै योग भएता पनि शयौं शुभयोगको थुप्रोलाई नाश गर्दछ यदि त्यस्ता दुष्टयोगका नाशक अन्य कुनै योग छैनन् भने । 'जस्तै द्वितीय स्थानको सूर्य छ भने अल्पधनिक हुन्छ, त्यस्तै द्वितीय स्थानमा बृहस्पति छ भने महाधनी हुन्छ ।' यहाँ दुबै विरोधी कुरो परेको हुनाले गुणले दोषलाई दवाउँदछ भनेर संतोष हुदैन । अतः पञ्चामृतले परिपूर्ण भएको घडामा एक बिन्दु मात्र मदिरा पर्‍यो भने पनि साराको सारा पञ्चामृत दूषित हुन्छ । अतः बिवाहकाल अल्प र विधान विस्तारपूर्वकको हुनाले कुनकाल र अंशलाई लिने र बैवाहिक कर्म गर्ने ।।८९½।।

इत्येतत्प्रतिबोधितुमाहः-

कृतकौतुक मङ्गलो वरो मधुपर्काद्यशनादनन्तरम् ।।९०।।
ज्वलिताग्नि समक्ष मङ्गलं यदवाप्नोति शुभाशुभंचतम् ।।९० १/२ ।।

वरो जामाता कृतकौतुकमङ्गल आदावेव शान्तिपूर्वकमनिष्ठानामुपशमनार्थं कृत आशीर्भिर्युक्तं वैदिकै-मंत्रैः; कङ्कणवद्धः कृते, यस्य सतया भूत ।

तथा चोक्तम् –
भद्राक्ष दर्भ सिद्धार्थ शिखिपक्षोगरत्वचः ।
कङ्कणौषधयश्चेति कौतुकारव्यः प्रकीर्तिता ।।
पुष्पकान्योदकुम्भश्च शङ्खोवादनमेवच ।
दधिपात्रं तथा लाजा मङ्गलाखयाः प्रकीर्तिता इति ।।

ततो मधुपर्काद्यशनाद्ण्याति प्रासनादनन्तरं, परतुआदिग्रहणाध्पाद्यार्घ मधुपर्कं दानं कृत्वा ततोऽन्तरं मधुपर्कं प्राश्य ज्वलिताग्नि सन्निधानेऽङ्गना कन्यका वरं यदंशका दवाप्नोति तत्तस्माच्छुभा शुभं लभते । यदुक्तं भवति, अंशके प्राप्तेऽग्नि प्रदक्षिणं कुर्यात् ।

तथा च देवलः–
आदावर्घादिकं कृत्वा प्राशनान्तर्यथोदितम ।
हस्तावलम्बनंकुर्या त्स्वाभिदृष्टे नवांशक इति ।।
एवं हस्तग्रहण कालांशकमुपयुज्यते, न पूर्वं न पश्चादिति ।।९० १/२ ।।

भावबोधिनी – पहिले नै अरिष्टशान्तिका निमित्त ग्रहशान्ति आदि कर्म गरेर रक्षाबन्धन बाँधेर कन्यादाताका घरमा जाने, कन्यादाताले मधुपर्क आदि कर्म सकेपछि त्यस समयमा पाउन सकिने शुभ अंश तथा मुहूर्तमा कन्याको पाणिग्रहण गर्ने र वैवाहिक कर्म गर्ने ।।९०१/२।।

तात्पर्यार्थमाहः–

चक्रे वराहमिहिरः प्रणिपत्यसाधून् सम्यक् विवाहपटलं पृथुतां विहाय ।।९१।।
पूर्वं च यद्युवति जन्म विधौ मयोक्तं संचिन्त्य तच्च सदसत्परि कल्पनीयम् ।।९११/२ ।।

वराहमिहिराख्य आचार्यः साधून् पण्डितान् प्रणिपत्य नमस्कृत विवाहपटलं चक्रे कृतवान् । सम्यक् स्पष्टतरं पृथुतां विस्तरतां विहाय त्यक्त्वा, अखिलमुनि प्रणितानि विवाह पटलानि ऋषिस्मृतानि च दृष्ट्वा तदर्थं स मया लघुग्रन्थो कृत इति । अनेन पौनरुक्त्यं परिहृत्य पूर्वं चेत्यादिना विनिर्देशं करोति । पूर्वं प्रथमं युवती जन्मविधौ स्त्रीजातक

विधाने यदुक्तं मया कथितं तच्च सर्वं संचिन्त्यैवं विचार्य तत्सदसच्छुभाशुभं विवाह पटलोक्तं चिन्तनीयमिति। स्त्रीजातक फलं तदेव सर्वदा भवति, तत्प्रकाशको वैवाहिको लग्नविधिरिति ।।९१½।।

वात्स्यं गर्गवशिष्ठ देवल कृतं सत्यप्रणीतं तथा ।
दृष्ट्वान्यान्यपि यद्वराहमिहिरो वैवाह्विकं स्वं व्यधात् ।।
तस्मिन् विद्वदभीष्टयोग जनित प्रामाण्य संप्राप्तधीः ।
शिष्याणां हितकाम्यया विवरणं चक्रे द्विजाग्र्योत्पलः ।।
वराहमिहिरो यस्मिन् विवाह पटलार्ण्णवे ।
अर्थिनामुत्पल श्चक्रे ऽर्थाप्तये विवृतिप्लवम् ।।
चिन्तामणीति विख्याता टीके ऽयं छात्रवर्णभा ।
अनुष्ठुप भाषितान्यस्याः प्रमाणेद्वादश स्मृतम् ।।
प्रीति द्विष्टे परित्यज्य टीका सम्यक् विचार्य च ।
उपयोग्या स्वशास्त्रे चेत्संग्राह्यो नोपरोधतः ।।
व्याख्येऽ यं जन्म जात्युक्तं यच्च युक्ति विवर्जितम् ।
शान्त्या वा लिखिते यच्च तत्सर्वं स्पष्टतां नयेत् ।।
वैशाखस्य सितेपक्षे दशम्यां सोमवासरे ।
नवरामनन्द (९३९) शाके कृतेऽयं विवृति मर्या ।।
विधाय टीकां शास्त्रेस्मिन् यत्किञ्चि त्पुण्यमर्जितम् ।
तेन निर्मत्सरी भूयात् सौजन्याऽलङ्कृतो जनः ।।
समाप्तेऽयं विवाहपटल टीका ।

भावबोधिनी–वराहमिहिर नामका आचार्य भन्द छन् सर्व सज्जन वर्गलाई प्रणाम गरेर धेरै ऋषिमुनीहरुले रचनागरेका ग्रन्थहरु हेरेर ठूलो ग्रन्थलेख्ने विचार त्यागें र यो सानो विवाहपटल मैलेलेखें। स्त्री जातीको शुभा शुभ लक्षण पहिल्यै लेखि सकेको छु। उपर्युक्त स्त्री जातकमा लेखेको विषय वस्तुको विचार गरेर विवाह पटलमा लेखे बमोजिम गर्नु। स्त्रीजातकमा वताएको फल शुद्धलग्नमा विवाह भएको छ भने अवश्य मिल्दछ ।।९१½।।

इति देवीप्रसाद लंसाल कृता भावबोधिनी टीका समाप्ता ।

शुद्धिपत्रम्

अशुद्धम्	पृष्ठम्	पंक्तिः	शुद्धम्
वलम्बुजाक्ष	ग	१५	दलिमम्बुजाक्ष
कहि	घ	१०	कोही
सेनापतहरु	घ	११	सेनापतिहरु
कन्यादान	५	८	कन्यादान
यद्यष्टमष्ठचगो	७	५	यद्यष्टमषष्ठराशिगो
गन्धयाल्यां	१२	१४	गन्धमाल्यां
धृंतदधि	१२	२३	घृंतदधि
प्रोक्दान्या	१७	१८	प्रोऊयान्या
स्यर्यमुषन्ति	१८	१८	स्थैंयमुषन्ति
दिनेयु	१८	२४	दिनेषु
तशनुकूल	२२	२१	ताशनुकूल
र्गादि	२५	१२	गर्गादि
भन्न	३०	२६	भन्ने
व्यतिरेकेणन्यशशि	३३	७	व्यतिरेकेणान्यशशि
मेशाद्या	३३	२४	मेषाद्या
मेषांशाऽन्यांकौ	३३	२९	मेषांशान्यांशकौ
शुम	३५	५	शुभगा
लोभसंपुक्ता	३९	७	लोभसंयुक्ता
ह्रित्याष्टमा	४१	१०	ह्रित्वाष्टम
मङ्गरक	४१	१०	मङ्गारक
पाणिणग्रह	४१	२९	पाणिग्रहण
त्र्यंदेस्काणे	४६	२५	त्र्यंशेद्रेष्काणे
र्सापणी	५६	१६	सर्पिणो
साद्धं	५७	४	सार्द्ध
रविभोम बुधजीवशुका: एवमेव	६१	२७	रविभौमबुध जीवशुक्रा:
अनुष्ठया:	६२	२८	अनुष्ठेया:
सतो	६३	२	ततो
तसैवाष्टम्या	६७	२७	तत्रैवाष्टम्या
पूर्णिमागो	६८	७	पूर्णिमाको
शोभमुपयुज्येत	६९	३	शोभनमुपयुज्येत

मुद्रकः– आदर्श छापाखाना रामशाह पथ, थापाथली । फोन नं. १३४१४